श्रीगणेशायनमः ॥

# ॥ मकरन्दविवरणम् ॥

श्रीमद्दिवाकरदैवज्ञकृतम् ॥

श्रीविश्वनाथदैवज्ञकृतोदाहरणसहितम् ॥

का[illegible]कीयप्रधानसंस्कृतपाठशालीय
ज्यो[illegible]पाध्यायपदवीं लब्धवता
मिश्रोपाह्वयश्रीमदुमाशङ्करशर्म्मणा
संशोधितम् ॥

वाराणस्यां
जैनप्रभाकरनाम्नि यन्त्रे
तदध्यक्षेण
मिश्रोपाख्यश्रीज्वालानाथ शर्म्मणा
च मुद्रितम् ॥

सं॰ १९४३। मार्गशीर्ष कृ॰ १ शुक्रे

Indira Gandhi National
Centre for the Arts

DATA ENTERED
Date 21/06/08

॥ श्रीगणेशाय नमः ॥

SANS
133.5
DAL

## ॥ अथ मकरन्दविवरणं—

सोदाहरणं प्रारभ्यते ॥

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-198
Date: 25.3.08

प्रज्ञांयतः प्राप्यकृतप्रतिज्ञं स्पर्द्धामिवध
त्तेप्रसभं प्रतिज्ञम् । अज्ञोऽपितं श्रीशिव
नामधेयद्गुरूपमं स्वीयगुरुंभजेऽहम् १ ॥
अथाऽनवद्यामलपद्मपादैः श्रीमन्नृसिंहो
त्यदिवाकरेण । प्रकाश्यते सन्मकरन्दसू
क्तिसरोजमानम्यगुरुंशिवाख्यम् । २ श्रीम
च्छिवात्समधिगम्यवरप्रसादवृत्तांशुभिर्वि
वरणाभिनवारविन्दम् ॥ एतद्दिवाकरवि
काशितमार्यवर्यभृङ्गाः पिबन्तुमकरन्दपि
पासवोये ॥३॥ पृष्टस्थितासन्नशाकोऽनत्ते
ष्टशाकावशेषप्रमकोष्टकस्थम् । तिथ्यादि
वारादिसवल्लिक न्तद्योज्यंसमीपस्थशक

Indira Gandhi National
Centre for the Arts

स्यकन्दे॥ ४॥खरामा ३० हिचक्रान्तिथेस्स
म्प्रादिष्टंभमृक्षस्य योगस्य भं २७सप्त ७ बा
रेखतर्कां६०हि चक्रन्तथावल्लिकायास्त
थाकन्दचक्र म्वियत्तर्कं६०भक्तम् ॥ ५ ॥

---

नत्वा गजाननंदेवं विश्वनाथःकरोत्य
सौ। उदाहरणमुद्दानम्मकरन्दस्ययत्नतः
॥१॥ श्रीसूर्यसिद्धान्तमतेनसम्यग्विश्वोप
कारायगुरुप्रसादात्। तिथ्यादिपत्रं वित
नोतिकाश्या मानन्दकन्दो मकरन्दनामा
२॥प्रज्ञांयतःप्राप्यति। अथानवद्यामिति।
श्रीमच्छिवादिति॥स्पष्टार्थानिपद्यानि॥
अथपञ्चाङ्ग साधनन्तत्रादौतिथिसाधन
म्॥ तत्राप्यभीष्टवर्षादिजतिथिवारादि
साधनमाह॥ पृष्ठस्थितासन्नेति॥ इष्टशक
मध्येपुस्तकीयशकःशोध्यः॥सयथा॥ पुस्त
कीयशकपङ्क्तावीष्टशकासन्नोयोन्यूनःश
कोभवति सतावच्छोध्योयावदग्रिमपुस्त
कीयशकतुल्योभवति तदनन्तरन्द्वयोस्तु
ल्यशकयोर्मध्येपुस्तकीयशकापेक्षयाएका
धिकोभूत्वायदैकोऽग्रेगच्छतितदासनशो

ध्यः । यस्तुल्योजातःसशोध्यः ॥ उदाह
रणम्॥इष्टशकः ॥१५५१॥ एतन्मध्ध्येऽयं
१५ ४४ पुस्तकीयशाकस्तावच्छोध्योया
वदग्रिमपुस्तकीयशाक १५६० । तुल्योभ
वति ॥ तदनन्तरमिष्टशाक । १५६१ म
ध्ध्येऽयं १५६० पुस्तकीयशाकःशोध्यो
यावदग्रिमपुस्तकीयशाक १५ ७६ तुल्यो
भवति ॥ एवमग्रेपिबोध्यम् ॥ ननुपुस्त
कीये १५६० ष्टशाकयोस्तुल्यतायामिष्ट
शाकमध्ध्ये । १५६० पुस्तकीयःशाकः १५
६०शुद्धत्र्त्येव॥एवंसत्ययमेवपुस्तकीयशा
कः १५४४ शोध्यइतिपूर्वंकिमर्थमुक्तमि
तिचेदुच्यते ॥ तत्रकारणम् ॥ पुस्तकीयशो
षपङ्क्तावेकमारभ्यषोडशशेषाणिसन्ती
तिकारणाच्छकद्वयतुल्यतायांसत्यामयमे
व १५४४ शोध्यइत्युक्तम् ॥ एवङ्कृतेषो
डशशेषाणिभवन्ति ॥ अतएवपुस्तकीयशा
कपङ्क्तौपरस्परषोडशान्तरान्तरष्ठति ॥
यदितुल्ययोः पुस्तकीयेष्टशाकयोरन्तरं
क्रियतेतदाकापिक्षतिर्नास्ति परन्त्वेता
वान्विशेषः ॥ तदापुस्तकीयशाकादधस्थ

तिथिवारादि स्थाप्यंतदधस्थावल्लीस्था
प्या॥ द्वयोस्तुल्यशकयोरन्तरेशेषंशून्यमेव
शिष्यते॥ तर्हिशेषपङ्क्तौशून्यकोष्टकोना
स्तीतिकारणाच्छकादधस्थमेव वर्षादौ
तिथ्यादिकम्भवति॥इदंपूर्वप्रकारेणसहतु
ल्यम्॥ तद्यथा॥ इष्टशकः।१५६०।ए
तन्मध्येपुस्तकीयशाकं १५४४ शोधिते
शेषम्।१६। पुस्तकीयशकादधस्थंतिथ्या
दिकम्॥ २७।५।२६।४५। वल्ली
५४।३६। ३४ शेषादधस्थतिथ्याद
कम्॥ २७। ६।६। १२ वल्ली ५
३०।१७। अनयोर्योगेजातम्वर्षादौ
तिथ्यादिकम्।२४।४।३२।५७। वल्ली०
६।५१ अथवेष्टशाकः।१५६०।एतन्मध्ये
यंपुस्तकीयशकः। १५६०। शुद्धःशेषं
पुस्तकीयशकादधस्थंतिथ्यादिकम् २४।
४।३२।५७। वल्ली०।६।५१।
अत्रशेषपङ्क्तौशून्य कोष्टकस्याभावा
ज्जातंवर्षादाविदमेवतिथ्यादिकं पूर्वंतु
ल्यमेव स्यात्॥ एवमिष्टशकमध्ये पुस्तकी
यशकेशुद्धेयच्छेषम्भवतितत्प्र मितकोष्ठ

Centre for the Arts

काद्धस्थन्तिथ्यादिकंस्थाप्यं वल्लीचस्था
प्या॥ तदनन्तरमेतन्मध्ये पुस्तकीयशकाद
धस्थांतिथ्यादिकंयोज्यम् ॥ वल्यांवल्लीचयो
ज्या॥तद्यथा ॥ तिथिस्थानेतिथिर्योज्या।वा
रस्थानेवारोयोज्यः । घटीषुघटीयोज्याप
लेषु पलानियोज्यानि । ततःपलस्थानेष
ष्ठिभक्तेसतिफलंघटीषुयोज्यंघटीषुषष्ठि
भक्तासुफलंवारेयोज्यम्॥ वारेषुसप्ततष्टेषु
शेषमभिमतोरव्यादिवारोज्ञेयः॥ अत्रलब्ध
स्यत्यागः ॥ एवंवर्षादौवारोभवति ।
अस्मिन्मकरंदे सर्वत्रवर्तमानोवारोज्ञेयः॥
तिथिःत्रिंशत्तष्टंशेषंवर्षादौतिथिर्भवति॥
अस्यैवनामान्तरं शुद्धिः ॥ वल्याउ
र्ध्वाङ्कःषष्ठ्यधिकस्तदाषष्टितष्टः शेषाव
र्षादौवल्लीभवति ॥ तदनन्तरमस्मिन्वा
रादौदेशान्तरसंस्कृतिःकार्या ॥ श्री ॥

---

अथदेशान्तरचालनयोःसंस्कारमाह ॥
रेखास्वदेशान्तरयोजनानि निजाङ्गघ्रही
नानि पलैर्युतोनम् ॥ पूर्वे परे वारमुख
म्भवेत्तन्मेषादिनेशे बहुधास्वदेशे॥६॥ एव

ङ्क्तातिथ्युडुयोगकन्दा विदा सदागुच्छ
युताविधेयाः॥क्रमेण गुच्छानिजसम्भ्रमेण
समाःसमायांसकलाभवेयुः॥७॥पञ्चेन्दुको
ष्ठाः प्रथमंविलेख्याश्चोर्ध्वस्थितास्तिर्यग
तास्त्रयश्च॥ तिर्यक्स्थकोष्ठःप्रथमंविलेख्य
स्वल्प स्तदन्यावधिकान्तरालौ ॥८॥ एकै
कयुक्तातिथिरूर्ध्वकोष्ठे ततोविलेख्यन्त
दधोदिनाद्यम् ॥ एकैकयुक्चालनसंस्कृत
ञ्चस्वचालकाढ्या तदधोलता च ॥९ ॥

---

रेखास्वदेशांतरयोजनघ्नी गतिग्रहस्याभ्र
गजै८०र्विभक्ता॥लब्धाविलिप्ताःखचरेवि
धेयाःस्वर्णंपरेप्राक्समयेविलोममिति ॥
यानिदेशांतरयोजनानिरविमध्यगत्यागु
णितानिकार्याणि॥पश्चादशीत्याभक्तानि
लब्धपलानिवारादिपलस्थानेरहित सहि
तानिकार्याणियदाग्रहे ऋणानितदाधना
नियदाधनानितदा ऋणानि तिथिनक्षत्र
योगसंक्रांतिमहानक्षत्रेषु ग्रहापेक्षयावि
परीतमित्युक्तत्वात् ॥ उदाहरणम् ॥ का
श्यां देशांतरयोजनानि ६४ ऋणानि

सूर्यगत्या ५९। ८ गुणतानि ३७
८४ अग्नी ८० त्याभक्तानिलब्धानिपला
नि ४७ ऋणानिदेशांतरस्यऋणसंज्ञ
कत्वात् तिथौविपरितमित्युक्तत्वाज्जा
तानिधनानि ॥ रेखा पुरात्स्वपुरस्य
प्रागपरदिगवस्थित्याऋ णधनत्वमवग
तम्* ॥ यस्मिन्वर्षेशुध्यङ्कएकविंशतिमा
रभ्यात्रिंशत्पर्यंतंसमायातितस्मिन् वर्षेऽधि
मासोज्ञेयः ॥ तद्यथा ॥ इष्टशाकः १५५
२ एतन्मध्येपुस्तकीयशके १५५४ शो
धितेशेषं ८शेषादधस्थातिथिः२८ शकाद
धस्थातिथिः २७ अनयोर्योगः ५५त्रिंश
त्तष्टेशेषं२५ अस्मिन्वर्षेऽधिमासोज्ञेयः॥ स
चसङ्क्रमणवशान्मासोज्ञेयः ॥ यस्मिन्मा
सेसंक्रान्तिर्नभवतिसोऽधिमासः ॥ अथो
दाहरणक्रमोलिख्यते ॥इष्टशकः १५५१ ए
तन्मध्येपुस्तकीयशकःशोधितशेषम्॥८॥
पुस्तकीयशकादधस्थाङ्कः २१। ५। २
६। ४५। शेषादधस्थाङ्कः १७। १।

* अत्र रेखानगराणि ॥ पुरी रक्षसां देवकन्याथ का
ञ्ची सितः पर्वतः पयली वत्सगुल्मौ । पुरीचोज्जयि
न्याह्वया गर्गराटं कुरुक्षेत्रमेरुभुवो मध्यरेखा ॥ १ ॥

Indira Gandhi National Centre for the Arts

सहितंजातंवर्षादौतिथ्यादिकम् । १४ । ६
४९ । २४ । एवंचैत्रशुद्धचतुर्दशीशुक्र
वारमारभ्यवर्षप्रवृत्तिः ॥ शकादधस्थाव
ल्ली । ५४ । ३६ । ३४ । शेषादधस्थाव
ल्ली ४६ । २८ । १५ । अनयोर्योगेजा
तावर्षादौवल्ली । ४१ । ४ । ४९ । एवं
कृताइति ॥ इदंवारादिकंवल्लीसहितंपंच
विंशतिधास्थाप्यम् ॥ अथानुक्रमेणतत्त
त्पक्षस्थतिथिगुच्छायोज्या ॥ तद्यथा ॥
प्रथमस्थानेशून्यकोष्ठकादधस्थ वारादि
कं॥०।०।०योज्यम् तदधस्थावल्ली०।०।०
वल्लीषुयोज्या ॥ एवंद्वितीयस्थानेप्रथम
कोष्ठकादधस्थवारादिकम् ॥०।४५। ३६।
योज्यंतदधस्थावल्ली । ३२ । ८ । २३ ।
वल्लीषुयोज्या ॥ एवमग्रेपि ॥ एवंकृतेस
तितत्तत्पक्षादौतत्तद्वारादिकम्भवति तथा
कृतेजातंप्रथमपक्षस्थंवारादिकम् ६ । ४९
२४ । वल्ली । ४१ । ४ । ४९ द्वितीयप
क्षस्थवारादिकम्० । ३५ । १० । वल्ली
। १३ । १३ । १२ तृतीयपक्षस्थंवारादि
कम् । १ । १९ । ५६ । वल्ली ४५ । २० ।

...onal Centre for the Arts

१६। एवमग्रे ऽपिचतुर्विंशतिपक्षाभवंति ॥
अधिमासश्चेत्तदाषड्विंशतिपक्षाभवन्ति
इतिनियामकत्वात्पचविंशतिरूपाविंशति
स्थानेस्थाप्यमिति॥ एकस्थानमधिकंकि
मर्थमुक्तमितिचेदुच्यते॥ इष्टवर्षादिमार
भ्यद्वादशमासांते ऽथवाधिमासश्चेत्तदात्र
योदशमासांतेवर्षसमाप्तिर्भवति ॥ अ
स्माद्द्वितीयदिवसे ऽग्रिमसौरवर्षस्य प्र
वृत्तिर्नभवतिकिन्त्वेकादशदिनान्तरेभव
तीति कारणादेक पङ्क्तिस्थचालनमतरा
तद्दिवसज्ञानार्थमधिकमुक्तम् ॥ अनया
रीत्याप्रतिवर्षमेकादशादितिथिवृद्धिः ॥
अनयारीत्यैकादशदिनवृध्या तृतीयव
र्षेऽधिमासोभवति ॥ अथतत्तत्पङ्क्तिस्थवा
रादौ तत्तत्पङ्क्तिचालनानिरहितानिकार्या
णि ॥ कुतःचालकस्यऋणत्वात् ॥ तत्त
त्पक्षादिस्थवल्लीषु वल्लीस्थचालनानिध
नानिकार्याणिचालनरूपधनत्वात् ॥ तद्य
था ॥ प्रतिपक्षंपञ्चदशकोष्ठकाःकार्याः॥
तत्रप्रथमकोष्ठस्थतिथिवारेष्वेकोयोज्यः
तद्यथा ॥ प्रथमकोष्टकस्थतिथिवारौता

Indira Gandhi National Centre for the Arts

वेव्रतयोर्मध्येएकोयुक्तःकार्यौ द्वितीयको
ष्टस्थतिथिवारौभवतः । एवन्द्वितीयको
ष्ठस्थतिथिवारमध्येएकोयुक्तस्तृतीयको
ष्ठस्थतिथिवारौभवतः॥एवमग्रेऽपि ॥ त
तःप्रथमकोष्टस्थवारादिकमध्येऽयंघट्या
दिचालनाङ्को०। ५७। ३६ घटिस्थाने
रहितःकार्यः ॥ तद्द्वितीयकोष्ठस्थघट्या
दिकम्भवति ॥ प्रथमकोष्ठेयथास्थितमे
व ॥ एवंद्वितीयकोष्टकस्थघटिकादिम
ध्येऽयंचालनाङ्को० । ५७ ।३६ रहितस्तृ
तीयकोष्टकस्थघट्यादिकम्भवति ॥ एव
मग्रेऽपि । तथाप्रथमकोष्टकस्थवल्लीयथा
स्थितैव ॥ तन्मध्येचालनाङ्को । २ ।८
३३ । ३२ ॥ योजितोद्वितीयकोष्टस्था
वल्ली भवति॥एवमग्रेऽपि॥एवंकृतेसत्यन्ति
मकोष्ठस्थंवारादिकन्तेनैवचालकेन रहि
तंसद्द्वितीयपङ्क्तस्थ वारादिकतुल्यम्भव
ति॥तदाशुद्धोयंक्रमः ॥ अन्यथाऽशुद्धः॥ए
वं वल्लीच॥उदाहरणम् ॥ प्रथमपक्षस्थति
थिवारादिकम् । १४।६। ४१ ।२४। ति
थौवारेचैकोयुक्तः ॥ १५ । ० घटी ४१

प० २४ । एतन्मध्येचालनाङ्को ०।५७
। ३६ । रहितोजातन्द्वितीयकोष्ठस्थंति
थ्यादिकम् । १५ । ० । ४८ । २६ ।
५४ । एवंप्रथमपक्षस्थावल्ली ४१ । ४ ।
४९ । मध्यंचालनांको २ । ८ । ३३ ३२
। युक्तोजाताद्वितीयावल्ली । ४३ । १३ ।
१२ । ३२ । एवमग्रेपि ॥ ॥ एवंकृतेद्वि
तीयपक्षस्थंतिथ्यादितुल्यं षोडशकोष्टक
स्थतिथ्यादिकंजातम् ॥

---

अथसविशेषन्तिथ्यादिस्पष्टीकरणमाह ॥
यद्वल्लिकोर्ध्वाङ्कसमानकोष्ठेसमी पनाडीभ
वकोष्ठजंफलम् ॥ समीपनाडीष्टघटीवि
योगक्षयर्द्धिघाताङ्गलवोनसंयुतम् ॥१०॥
घट्यादिनातेनयुतन्दिनादिस्पष्टन्तिथेः
स्यादुपरिस्थितायाः॥ऊर्ध्वस्थितेषूडु २७
मितेषु कोष्ठेष्वेवम्भयुतयोःखलु साधनं
स्यात् ॥११॥ युगेषु५४ प्रमितासन्ननाडीचेद
न्तरङ्कुरु॥वल्ल्यूर्ध्वाङ्काग्रमाङ्कस्थशू
न्यनाडीफलेनतु ॥१२॥ तिथ्यादावादिको
ष्ठस्थेवल्ल्यांवारादिकेतथा॥नदेयश्चालन

न्देयन्द्वितीयादावितिस्फुटम् ॥ १३ ॥

ग्रुथवल्यांयऊर्ध्वांको भवतितत्तुल्यांतिथि
सौरमस्थकोष्ठकोग्राह्यः पश्चाद्वल्लीस्थो
र्ध्वांकादधस्थायाघटिकाभवति। तन्न्यूनं
तदासन्नतीर्यक्पंक्तिस्थघटिकायां तत्को
ष्ठकादधस्थघटिका पलानिचस्थाप्यानि
तदनन्तरं । एतदधस्थघटिकाभिःसहांत
रंकार्यम् । तद्धनर्णसंज्ञकम्भवति । यदा
अधस्थघटीमध्येशु द्धंतदाधनसंज्ञकमन्त
रम्भवति ॥ अन्यथाऋणसंज्ञकम्भवति
यदातिर्यक्पंक्तौचतुः पञ्चाशन्मितघटि
कादिकंफलं गृहीतन्तदातदधोघटिकाया
अभावात् ।। केनसहान्तरंकार्यमित्याह।
युगेषुप्रमितासर्व्वेति ॥ तिर्यक्पंक्तौशून्य
घटिकायांवल्लीस्थोर्ध्वांकतुल्यकोष्टकाद
धस्थघटि काभिः सहान्तरंकार्यमिति ॥
अत्रोदाहरणम् ॥ वल्ली । ५३ । ५६।१०।
त्रिपञ्चाशदधस्थातिर्यक् पंक्तौचतुःपञ्चा
शदघटिकायाघट्यादिकम् ८।५२ चतुः
पञ्चाशत् कोष्ठकादधस्थातिर्यक् पंक्तौ
शून्यघटिकायाघट्यादिकम् ॥ १।५ च्यु

नयोरन्तरं १३। एवं बुद्धिमताज्ञेयम् ॥ तद
नन्तरन्तिर्यक्पङ्क्तौयाघटिकागृहीता
ताबल्लीस्थघटिकामध्येंशोध्या: शेषघटि
कापलानिभवन्तितानितेनान्तरेण गुण्या
निपञ्चात्षड्भिर्भक्तेलब्धान्येतानि पूर्वस्था
पितघटीमध्ये रहितानि सहितानिकार्या
णि ॥ तद्यथा ॥ यदाऋणमन्तरं तदार
हितानि यदाधनंतदासहितानि कार्य्या
णि ॥ एवं कृतेयाघटिकापलानिभवन्ति
ता: कोष्ठकस्थघटीमध्येयोज्यातदा स्य
ष्टाघटिकाभवन्ति ॥

॥ अथ मध्यमासबल्लिकास्तिथय: ॥

| | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १४ | १५ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १३ | १४ | ति० |
| ६ | ० | १ | २ | ३ | ४ | ५ | ६ | ० | १ | २ | ३ | ४ | ५ | ६ | ० | बारा: |
| ४९ | ४८ | ४७ | ४६ | ४५ | ४४ | ४३ | ४२ | ४१ | ४० | ३९ | ३८ | ३७ | ३६ | ३५ | ३५ | घ० |
| २४ | २६ | २८ | ३१ | ३३ | ३६ | ३८ | ४० | १३ | ४५ | ४८ | ५० | ५२ | ५५ | ५७ | ० | प० |
| ० | २४ | ४८ | १२ | ३६ | ० | २४ | ४८ | १२ | ३६ | ० | २४ | ४८ | १२ | ३६ | ० | वि० |

| | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ४१ | ४३ | ४५ | ४७ | ४९ | ५१ | ५३ | ५६ | ५८ | ० | २ | ४ | ६ | ८ | ११ | १३ | बल्लीघट्यादि |
| ४ | १३ | २१ | ३० | ३९ | ४७ | ५६ | ४ | १३ | २१ | ३० | ३८ | ४७ | ५६ | ४ | १३ | |
| ४७ | १२ | ५६ | २९ | ३ | ३६ | १० | ४३ | १० | ५० | २४ | ५७ | ३१ | ४ | ३८ | १२ | |
| ० | ३२ | ४ | ३६ | ८ | ४० | १३ | ४४ | १६ | ४८ | २० | ५२ | २४ | ५६ | २८ | ० | |

अर्थात्तिथ्यादिवृद्धिक्षयलक्षणंतत्संख्याञ्चा
ह॥तिथ्यादिबारमपहाययदागतंतत्पूर्वैर्ह्यहि
षष्ठि ६० घटिकाः स्युरियं हि वृद्धिः ॥ चेद्यु
ग्ममेकदिवसे परनाडिकास्ताः पूर्वाऽनिताः
स्युरिहपूर्वगमात्क्षयोऽयम् ॥ १४ ॥ सांघ्रि
सिन्धु ४ । १५ रस ६ सिन्धुर ८ प्रमा
तारकातिथियुजांक्षयप्रमा । नाडिकासु
सदलाङ्ग ६ । ३० मार्गणा ५ व्यंघ्रिलो
चन १ । ४५ मितामताचितिः ॥ १५ ॥

यदा तिथिरेकवारमुल्लं घ्याग्रिमबारंग
च्छति तदा पूर्वास्मिन् वारेषष्ठि ६० घ
टिकात्मिकातिथिःस्थाप्या । शेषघटिका
परदिवसेथाप्याइयंहिवृद्धी । यदैकवा
रेतिथिद्वयं भवेत् तदवमादिनम् तदाताः
पूर्वघटीभिरूना कार्य्यातदासारुपष्टा भ
वेत् । अनयारीत्यानक्षत्रयोगसाधने
ऽपि । अत्रोदाहरणम् ॥ प्रथम पक्ष
स्यप्रथमकोष्ठकस्थावल्ली ४१ । ४ । ४१ ।
अत्र वल्ल्याउर्द्धांङ्क एकचात्वारिंशद्वर्त्तते
स्मात्कारणात्तिथिसौरभस्यैक चत्वारिंश
त्कोष्ठकादधस्थ फलं ग्राह्यम् । वल्ल्यांच

Indira Gandhi National Centre for the Arts

टिकाचतुष्टयं वर्त्ततेऽस्मात्तिर्य्यक्पङ्क्तौ शून्यघटिकायोघटयाद्यका: । ३ । ५ । अयमधस्थघटिका २ । २५ मध्येनशुद्ध्यत्यतोऽयमङ्क: पूर्वघटिकामध्येशोधिते शेषम् ७ पलाद्यमृणसंज्ञम् । अत्रान्तरे क्रियमाणे घटीस्थानेशून्यमेवावशिष्यते। वल्लीस्थघटिका शून्येनगुणिता शून्यमेव जाता षष्टिभर्भक्तेशून्यमितिकारणाद्घटीस्थानेशून्यत्यागक्रियते फलंपलात्मकमन्तरमेव गृह्यतेवल्लीस्थघटिकादिकम् ४ । ४९ । इदंतिर्य्यक्पंक्तिस्थशून्यघटीभीरहितंजातम् ४ । ४९ इदमन्तरेणानेन ७ गुणितंजातम् ३३ । ४३ षष्टभक्तंलब्धान्येतानि५पलानिपूर्वघटीपल ३ । ५ मध्येरहितानिजातानि घटीपलानि । ३ । ० एतानिपूर्वस्थापितप्रथमपक्षस्यप्रथमकोष्ट घटीपलमध्ये ४९ । २४ युतानि जातानि चैत्रशुक्लचतुर्दश्यांभृगौ स्पष्टानि घटीपलानि ५२ । २४ ।एवमग्रेऽपिबोध्यम् ।

तथा कृते जात:प्रथमपक्ष: ॥

| | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| शु | श | र | चं | मं | बु | बृ | शु | श | र | चं | मं | बु | बृ | शु | श | वा० |
| १४ | १५ | १ | २ | ३ | ४ | ५ | ६ | ७ | ७ | ८ | ९ | १० | ११ | १२ | १२ | ति० |
| ५२ | ४६ | ४७ | ४६ | ४७ | ४९ | ५२ | ५६ | ६० | १ | ६ | ११ | १६ | २० | २३ | २४ | घ० |
| २४ | २५ | ३३ | ५२ | ३० | ३१ | ३५ | ४४ | ० | ३३ | ४६ | ५४ | ३१ | ३२ | १ | ३४ | प० |

एवंनक्षत्रयोगयोरपिसाधनम् । तद्य
था ॥ इष्टशकमध्ये १५५१ पुस्तकी
यशाके १५४४ शोधितेशेषम् ७ शका
दधस्थाङ्काः । २४ । ५ । ९ । ३८ शेषा
दधस्थाङ्काः १६ । २ । ६ । २३ अनयो
र्योगेजातम् ४० । ७ । १६ । १ इदन्दे
शान्तरपलैः ४७ सहितम् ४० । ७ । १६ । ४८
ऊर्द्ध्वाङ्केसप्तविंशति २७ तष्टेजातम् १३
तदधस्थसप्ततष्टेजातम् । ० । एवंजातंव
र्षादौनक्षत्रादिकम् । १३ । ० । १६ । ४८
यस्मिन्दिनेतिथ्यारम्भो भवतितस्मिन्नेव
दिनेनक्षत्रयोगारम्भइतिनियमोनास्ति।
किन्तु। तद्दिनात्पूर्वेपरे वादिवसे भवति।
अतश्चैत्रशुक्ल १५ शनौहस्तनक्षत्र प्रवृ
त्तिः । शाकादधस्थावल्ली ५३। ५५। ३१
शेषादधस्थावल्ली ४८ । ५ । ७ अनयोर्यो
गेजातानक्षत्रवल्ली ४२ । ० । ३० इदंन

क्षत्रादिकंसवल्लिकं चतुर्दशस्थानेस्थाप्यम् । अधिमासश्चेत्पञ्चदशस्थानेस्थाप्यम् । अनुक्रमेणतत्तत्पक्षस्थनक्षत्रगुच्छायोज्या । तद्यथा । प्रथमस्थानेशून्यकोष्टकादधस्थंवारादिकम् ०।०।० योज्यम् । तदधस्थावल्लीषुवल्लीगुच्छाङ्को०।०।०योज्यः। एवंकृतेतत्तत्पक्षादौनक्षत्रादिकंभवति । तथाकृतेजातं प्रथमपक्षस्य वारादिकम् ।०।१६।४८ द्वितीयपक्षस्यम् । ६।३६। ३८ प्रथम पक्षस्थावल्ली ४२।०।३०। द्वितीयपक्षस्थाच ४१।३१।५७ एवमग्रेऽपि । अथतत्तत्पक्षादिषुवारादौ तत्तत्पक्षचालनानिसहितानिकार्य्याणि । वल्लीषुच । प्रथम पक्षे सप्तविंशतिकोष्टकाःकार्य्याः । तत्रप्रथमकोष्टे प्रथम कोष्टस्थनक्षत्रादिकंस्थाप्यम् । तदधस्तत्तत्पक्षवल्लीस्थाप्या । तदनन्तरं प्रथमकोष्ठस्थ नक्षत्रादिकंयथास्थितमेवस्यात् । एतयोर्मध्ये चैकैकयुक्तःकार्य्यः । द्वितीयकोष्ठस्थनक्षत्रचारौभवतः । एवमग्रेऽपि । प्रथमकोष्टस्थघटिकायथास्थिता एव।एतन्मध्येऽयं

Indira Gandhi National Centre for the Arts

प्यमधिमासश्चेत्पञ्चदशस्थाने ॥ अथा
नुक्रमेणतत्तत्पक्षस्थागुच्छायोज्या ॥ त
द्यथा । प्रथमस्थानेशून्यकोष्ठकादधस्थ
वारादिकम् ० । ० । ० । योजितेजा
तम् ० । १७ । ४७ बल्लीषुयोजितासु
जातावल्ली ४१ । ५९ । ६ एवंद्वितीय
कोष्ठेप्रथमकोष्टस्थंवारादिकम् ४ । २
७ । २४ योजितेजातं ४ । ४५ । ११
वल्लीगुच्छा ५५ । २६ । २५ बल्लीषुयो
जितासुजातावल्ली ३७ । २६ । १ । एव
मग्रेऽपि ॥ प्रथमपक्षस्थयोगादिकम् ।१३
०।१७।४७ योगस्थानेवारस्थानेंचैकैकोयु
क्तःघटीपल १७। ४७ मध्येऽयंघट्यादि
चालनाङ्को २।२५ । ४६ । रहितोजा
तंद्वितीयकोष्ठस्थंबारादिकम् । १५ ।
। २१ १४ एवंप्रथमपङ्क्तिस्थबल्लीमध्ये
चालनाङ्को २ । ३ । १३ । ८ योजि
तेजाताद्वितीयकोष्ठस्थावल्ली ४४ । २
११ । ८ एवमग्रेऽपि ॥ अथयोगस्पष्ठी
करणम् । प्रथमकोष्ठस्थावल्ली ४१ । ५९।६
योगसौरभस्यैकचत्वारिंशत्कोष्ठ कादध

स्थचतुः पञ्चाग्राद्घटीकायाघट्याद्यङ्कः १ । ४२ अधस्थांकः १ । ३७ अनयोरन्तरमृणेन । ५ । बल्लीस्थघटिकापलानि ५ । ६ गुणितानिजातानि २५ । ३० षड्भक्तेफलानि ४ । १५ पूर्वघटिकादिमध्येरहितानिजातानिघटीपला १ । ३८ न्येतानिपूर्वघटीपलमध्ये १७।४७ युतानिजातानिचैत्रशुक्लपूर्णिमायां शनौव्याघातयोगस्य स्पष्टानिघटीपलानि १९।२५ । एवमग्रेऽपि ॥

---

अथचालकशुद्धत्वज्ञानोपायमाह ॥

अद्येन गुच्छेनविहीनितस्य परस्यगुच्छस्यघटीमुखंयत् । षष्ठेः ६० खतर्कानलतो ३६० विशुद्धं तिथ्यृक्ष १५ । २७ भक्तंतिथियोगयोः स्यात् ॥१६॥ नाड्यादिकंचालनमस्वमेवमथोडुगुच्छोन परस्यनाड्यः।वारान्विहायाद्रियमै २७विभक्ताधनाह्वय।स्तारकचालनानि ॥१७॥तिथ्यादिवल्ल्यः परतोविशुद्धाः स्वसंख्ययाप्राधनचालनानि । शोध्यं न शुद्ध्येद्यदितर्हिदेया वारेऽद्रयः ७ षष्ठि ६० मिता

लतायाम् ॥ १८ ॥

आद्येनेति । तिथिगुच्छान्तरंघट्यादि कंषष्ठितः ६० शुद्धंपञ्चदश १५ भक्तंफ लंघट्यादिकमृणंचालनंस्यात्तिथौ । उदा हरणम् । प्रथमकोष्ठकादधस्थंवारादि कम् । ० ४५ । ३६ अनेनोनंद्वितीयकोष्ठ कादधस्थंवारादिकम् । १ । ३० । ३२ शेषं । ४४ । ५६ षष्ठितः ६० शोधितेशे षं १५ । ४ पञ्चदश १५ भक्तंलब्धं १ । ० । १६ अयमेवचालनांकोभवति ॥ एवंयोगगु च्छान्तरंघट्यादिकं षष्ट्यधिकशतत्रये भ्यःशुद्धंसप्तविंशतिभक्तंफल मृणञ्चालनं योगे॥उदाहृतिः।प्रथमकोष्ठकादधस्थंवा रादिकम् । ४ । २७ । २७ इदंद्वितीयको ष्ठकादधस्थवारादिक १ । ५६ । २६ मध्येशोधितेशेषं । ४ । २९ । २ अस्य घटीकार्या २६९ । २ खतर्कानलतः ३६० शोधितेशेषं । ९० । ५८ सप्तविं शति २७ भक्तेलब्धं । ३ । २२ । ९ चा लनमृणंयोगे ॥ वारान्विहायनक्षत्रगुच्छ कान्तरं २७ एभिर्भक्तंफलंधनचालनम् ।

तद्यथा। प्रथमकोष्ठकादधस्थंवारादिकम्
६। २०। १९ बारान्दूरीकृत्वाघट्यादिकं २० ।
१९ द्वितीयकोष्ठकादधस्थघटीपलेषु ४०। १८
शोधितेषुशेषं २०।८ सप्तविंशतिभक्तेफलं
घनचालनंनक्षत्रे ७७। ४४। २६। ४०।

अथ कोष्ठककरणमन्तरा स्वेष्टतिथ्याद्या
ऽऽनयनम् ॥

विकन्द तिथ्यो भयुयात तिथ्यो ब
र्षादित स्ते तिथिसञ्चयाःस्युः । ते ही
निताः स्वाङ्गगुणांश ३६ केन स्वदृग्य
मांशेन २२ युताभयुत्योः॥ १९॥ स्वसंख्य
याप्ता गत गुच्छकाःस्युस्तत्संख्यकाधः
स्थित वासराद्यम् । शेषान्विनं मूर्द्धिन
गाव शेषं बल्ली च कन्दाख्यलतायुते ते ॥
२० ॥ तेस्वेनशेषाहत चालकेन सुसंस्कृते
प्राग्वदतोऽवशेषे । कृतेभत्रेतस्पष्टतरं दि
नादि तिथ्यृक्षयोगोभ्दवमिष्टकाले॥ २१॥
भयोगकोष्ठकावर्ष मुखनक्षत्रयुग्युताः ।
भतष्टा भयुतीस्याता मित्यूचुः पूर्वसूर
यः ॥ २२॥ यदाधिकात्तिथिः समादि मा
न्मधो स्तदा बुधः । गताब्द कन्दत स्ति

थीभयोगमानमानयेत् ॥ २३ ॥

विकन्दतिथ्यइति ॥ वर्षमध्ये यस्मिन्मा
सेयातिथिरतेभ्यतेतत्तिथिपर्य्यन्तं चैत्र
शुक्लप्रतिपदभारभ्यातिथयः स्थाप्याः ।
तावर्षादितिथ्याहीनाकार्य्याः शेषाः सौ
रवर्षादेरिष्टदिन पर्यन्तंतास्तिथयो भव
न्ति । अभीष्टनक्षत्रयोगसाधनेंतास्ति
थयोद्विष्ठाःकार्य्याः । एकत्रस्वषट्त्रि
शदंशेन ३६ हीनाःकार्य्याः । अप
रत्रस्वद्वाविंशत्यंशेनयुताः कर्याः । नि
रवयवेनोभयत्रापिहीनायुक्ताः । तेवर्षा
दितोनक्षत्रयोगाभवन्ति । तिथयःपञ्च
दशभक्ताः । नक्षत्रयोगौसप्तविंशत्याभ
क्तौ फलंनिरवयवं ग्राह्यं । ते तिथिन
क्षत्रयोगकोष्ठकाःस्युः । एतत्कोष्ठका
दधस्थस्वस्वगुच्छास्थाम्बरादिकं स्थाप्य
म् । बल्लीचस्थाप्या । बारादिकमध्ये व
र्षादौदेशान्तरसंस्कृतं यद्वारादिकंतद्योज्यं
बल्लीषुबल्लीयोज्या । तदनन्तरंवारस्था
ने पञ्चदशभक्तेशेषतिथयो युक्ताःका
र्याः।बारस्थानेसप्त ७ तष्टंकार्यं । एवंन



Indira Gandhi National Centre for the Arts

133·5
DEV-



क्षत्रयोगौ वर्षादिस्थनक्षत्रयोगाभ्यां स
हितौकार्य्यौ।ऊर्द्ध्वाङ्केसप्तविंशातितष्टे। अ
भीष्टनक्षत्रयोगौभवतः। वारादिकमध्ये
स्वस्ववर्षादिस्थदेशान्तर संस्कृतंवारादि
कंयोज्यं वल्लीषुवल्लीयोज्या। वारस्थानेशे
षनक्षत्रयोगायुक्ताःकार्याः। ततोवारस्था
नेसप्ततष्टंकार्यम्। तदनन्तरं स्वस्वचा
लकःशेषांतिथ्यादिनागुण्यः। चालकश्चेद्धृ
नं तदाघटीस्थानेयुक्तःकार्यः। ऋणेर
हितः। यदानशुद्ध्यति तदा वारादेको
ग्राह्यः। एवमेववल्लीषु। एवंतिथिनक्ष
त्रयोगानां वल्लीसहित वारादिकंभवति।
अस्मात्प्रागवत्स्वस्वसौरभो परिस्पष्टाघ
टिकादिकाःसाध्याः। ताअभीष्टतिथ्या
देःस्पष्टाघटिकाद्याभवन्ति॥ अत्रोदाहरण
म्॥ शाके१५५१वैशाखकृष्णदशम्यांतिथि
नक्षत्रयोगानांस्पष्टघटिकाद्या ऽनयनम्।
तत्रचैत्र शुक्लप्रतिपदमारभ्यवैशाखकृष्ण
दशमीपर्यन्तमिष्टतिथयः २५ एतावर्षा
दितिथ्या१४हीनाःकार्याःशेषतिथयः ११
पञ्चदश १५ भक्ताःफलं०शेषं ११ तिथि



IGNCA RAR
ACC. No. R 198
Indira Gandhi National Centre for the Arts

गुच्छास्थंशून्य कोष्ठकादधस्थंबारादिक
म् ० । ० ।०। बल्लीच । ० । ० । इदं ब
र्षादिस्थबारादिभिः ६ । ४७ । २४ स
हितंजातं ६ । ४१ । २४ बारस्थानेशेष
तिथि ११ युक्तं १७ । ४१ । २४ सप्तत
ष्टंजातंबारादिकम् ३ । ४१ । २४ । ब
ल्लीषु ० । ० । ० बल्लीयोज्या ४१ । ४ ।
चालकः । ० । ५७ । ३६ शेषतिथिभि ११
गुणितः १० । ३३ इदं घटीस्थानेरहितं
जातम् । ३ । ३८ । ५१ बल्लीस्थचा
लकः । २ । ८ । ३३ । ३२ शेषतिथि
भि ११ गुणितः २३ । ३४ । ३ अनेन
बल्लीयुक्ताजाताबल्ली ४ । ३८ । ५२ आ
भ्यां प्राग्वज्जातावैशाख कृष्णदशम्यांबु
धेघटीपलानि १६ । ३१ एताःपूर्वाऽऽ
नीततुल्याजाताः । अस्यांतिथौ नक्षत्र
योगानयनम् ॥ शेषतिथयः ११ स्वषट्
त्रिंशदंशे ३६ नानेन ।०। रहिताजाताः
११ पुनस्ताएवतिथयःस्वद्वाविंशत्यं २२॥
शेन ।०। युक्ता ११ । जातौ नक्षत्रयो
गौ । अनयो रूर्द्धं सप्तविंशतिभक्तंफलं

।०। श्रुतोनक्षत्र गुच्छास्थं शून्यकोष्ठका
दधस्थवारादिकम् । ०।०। ० । बल्ली ।
०।०।०। एवं योगगुच्छास्थं वारादिकं ।
०। ०। ० बल्ली ०।०।० । नक्षत्रवारादिक
म् । ० । ० । ० वारस्थानेशेष ११ नक्षत्रै
र्युतम् ११ । ० । ० इदंवर्षादिनक्षत्र
वारादिभि ० । १६ । ४८ युतं ११ ।
१६ । ४८ सप्त। ७ तष्टं जातं वारा
दिकं ४ । १६ । ४८ बल्लीषुबल्लीयुक्ता
जाताबल्ली ४२ । ० । ३० । एवमेव
जातंयोगवारादिकम् ०। १७ । ४७ ब
ल्ली ४१ । ५९ । ७ नक्षत्रचालकः ०।४४
४८ । शेष ११ नक्षत्रैर्गुणितः ८ । १३
इदं घटीस्थाने युतं जातं नक्षत्र वारा
दिकम् ४ । २५ । १ बल्लीचालकः २
। १२ । १६ । ३३ । शेषनक्षत्रै ११ गु
णितः २४ । १५ । २ । ३ अनेनवल्ली
युता जातावल्ली ६ । १५ । ३२ पूर्वानी
तनक्षत्रमध्ये ११ वर्षादिस्थनक्षत्र १३
युतं जातं २४ शततारकानक्षत्रम् ।
अस्मात्प्रागवज्जातावैशाखकृष्णैकादश्यां

गुरौशत तारकानक्षत्रस्यस्पष्टाघटिका:
३ पलानि ११ अथ योगवारादिचालक:
३ । २५ । ४६ शेषयोगै ११ गुणितं
३७ । ४३ । ३६ इदं घटीस्थानेरहितं
जातं ३ । ४० । ४ बल्लीस्थचालक: २ ।
३ । १३ । ८ शेषयोगै ११ गुणित: ३२
३५ । २४ । ४८ अनेनबल्लीयुताजाता
बल्ली । ४ । ३४ । ३० पूर्वानीतयोगमध्ये
११ वर्षादिस्थयोगयुक्तेजात:शुक्लयोग: ।
अस्मात्प्रागवज्जातानि वैशाखकृष्णदश
म्याम्बुधेस्पष्टानिघटीपलानि १२ । १०
अनयारीत्या सर्वत्रातिथ्यादीनांस्पष्टीकर
णम् ॥ ॥ श्री ॥

॥ अथसंक्रान्तिमहानक्षत्रयो:साधनमाह ॥

पूर्वोक्तरीत्या शाकयोर्वियोगात्स्वदेशजं
वारमुखम्प्रसाध्यम् ॥ स्वक्षेपयुक्तं रवि
राशिताराप्रवेशवारादि भवेत्स्फुट न्तत्
॥२४॥ त्रिंशद्दिनान्तरे लेख्या स्स्ववारे रा
शिसंक्रमा: ॥ भसंक्रमा स्तथा स्वीय वारे
शक्र १४ दिनान्तरे ॥ २५ ॥

Indira Gandhi National Centre for the Arts

पूर्वोक्तरीत्येति। अत्रव्याख्यारूपमुदाहर
णम्॥इष्टशक ।१५५१ मध्येपुस्तकीयशके
१५४४न्योध्येशेषम् ७शकादधस्थवारादिक
म् । ५ । ४१ । १७ न्योषादधस्थवारादि
कम् १ । ४८ । ४० अनयोर्योगेजातं० ।
२९ । ५७। इदंदेशान्तरपलैः ४७ सहितं
जातोऽब्दपः । ० । ३० । ४४ अयं द्वाद
शस्थानेस्थाप्याःक्रमेण मेषादिद्वादश सं
क्रान्तिक्षेपैर्युक्ताःकार्यास्तदा द्वादशसं
क्रान्तयोभवन्ति ॥ तद्यथा ॥ अब्दपम
ध्ये ।०। ३०। ४४ मेषसंक्रान्तिक्षेपको
०।०।०। युक्तोजातोमेषसंक्रान्तिः ०।३०।
४४सचवहुधायस्मिन्दिने प्रथमातिथिर्भ
वतितस्मिन्नेवदिने मेष संक्रमणम्भव
तिकदाचित्पूर्वापरदिनेभवति ॥ एवं
चैत्रशुक्लपौर्णमास्यांशनावासु घटीपलेषु
मेषसंक्रान्तिः । एवंवृषसंक्रान्तिक्षेपको
२ । ५७ । १ ऽब्दप ०। ३०। ४४ मध्ये
युतोजातोभौमवारे । आसु २७ । ४५
घटीपलेषुवृषसंक्रान्तिप्रवेशः । एवं मिथु
नादिष्वपि ॥ एवमब्दपःसप्तविंशतिस्था

Indira Gandhi National Centre for the Arts

नैस्थाप्याः । अश्विन्यादिसप्तविंशतिक्षेपकैर्युक्तास्तदा तत्तन्नक्षत्रप्रवेशो भवति। तद्यथा ॥ अश्विनीनक्षत्रस्य क्षेपकः ०।०।० अब्दप ०। ३०। १४। मध्येयुतो ज। तस्मैत्रं शुक्लपौर्णमास्यांशनावासुघटी पलेषु ३०। १४ अश्विनीप्रवेशः। एवमग्रेऽपि ॥ संक्रमात्संक्रमस्त्रिंशद्दिनान्तरे प्रायो भवति। नक्षत्रान्नक्षत्रप्रवेशश्चतुर्दशदिनान्तरे भवतीत्यतस्त्रिंशद्दिनान्तरे चतुर्दशदिनान्तरे स्वस्ववारक्रमेण राशिनक्षत्रप्रवेशौ लेख्यौ ॥ ॥

---

॥ अथ प्रसङ्गात्सायनसंक्रमणं तत्प्रशंसाऽचाह ॥

ध्रुवायनांशोनित संक्रमार्कासन्नार्कविश्लेषकलाजवाप्ता। लब्धोनयुक्ताऽवधिवासराद्येसंक्रान्तयः सायनसंज्ञकाःस्युः॥ २६॥

तास्वेव पुण्यातिशयोमुनीन्द्रा वसिष्ठमुख्याजगदुर्महान्तः। सद्युक्तियुक्तं च विलोक्यतेऽदःपरं न चैतद्व्यवहारयोग्यम्॥ २७॥

अथायनांशोनितेति । यस्मिन्नाशौसो
यनसंक्रान्तिरपेक्ष्यते तद्राशावयनांशाः
शोध्याःस राश्यादिसूर्यौभवति तदासन्न
पञ्चाङ्गावधिस्थसूर्येणसहान्तरं कार्यम् ।
तस्यकलाःकार्याः अवधिस्थसूर्यगत्याभा
ज्याःफलंदिनाद्यंग्राह्यम् ।तदवधिस्थवारा
दौसहितंर हितंकार्यम् ॥यदावधिस्थसूर्या
दूनोभवति तदासहितं । अधिकेरहितंका
र्यमित्यर्थः । तस्मिन्वारेसायन संक्रान्ते
र्घटिकाद्याभवन्ति ॥ अत्रोदाहरणम् ॥
शके । १५५१ सायनवृषसंक्रान्तिःसाध्य
ते तत्रायनांशाः १६ । ५७।० । एकराशि
मध्येशोधितोजातः सूर्यः ० । १६ । ३
।० अस्यासन्नोवैशाखकृष्णतृतीयायांश
नावध्यर्कः ०। १३ । ३८ । ३९ अनयो
रन्तरकलाः ३५ । ३९ अवधिस्थार्कग
त्या ५८ । १२ भक्ताःफलंदिनाद्यम् ।
०। ३६ । ४५ इदमवधिस्थवारादिकम
ध्ये०। २९ । २७ रहितंजातावैशाखकृ
ष्णद्वादश्यांभृगौसायनवृषसंक्रान्तिघटि
काद्या । ५२ । ४२ । एवंसर्वत्र

॥ अथाधिमासक्षयमासलक्षणमाह ॥

स्पष्टार्कसंक्रान्ति विहीनचान्द्रमासोऽधि
मासोऽग्रिममासनामा॥यत्रेन्दुमासे रविसं
क्रमस्य द्वयम्भवेत्तत्क्षयमासमाहुः ॥२७॥

स्पष्टम् ॥

॥ अथ ग्रहदिनवल्लीसाधनमाह ॥

द्युकान्तरात्प्रोक्तदिशा प्रसाध्या खगद्यु
वल्ली विबुधैःसवारा ॥ वारोऽत्र सूर्यादथव
ल्लीका सा सवर्णिता व्योमरसैः ६० क
लेस्स्यात् ॥ २८ ॥ दिवागण स्सप्तहृता
बशेषोवारो भवेद्दैत्यपुरोहिता द्वा ॥ तप
स्यदर्शेनिकटे ऽथ बा स्यात्तिथौस्वत्रारे
नियमेन वल्ली ॥ २९ ॥ तदुद्भवम्भानुम
पेक्षिताकांदनूनमूनंसमवेक्ष्यवल्लीम् ॥ ऊ
नामनूनांखगुणै ३० स्तलाङ्के बारं च यु
ग्मोन युतम्विधेहि ॥ ३० ॥ तन्मेषसंक्रा
न्तिदिनान्तराल दिनैरुपेतास्वतलस्थिता
ङ्के ॥स्यान्मेषसंक्रान्तिदिनेऽर्द्धरात्रे प क्षो

द्वैत्रचालनकैर्युतासौ ॥ ३१ ॥ पक्षान्तगः
स्यादजवेशवारस्तलस्थवारेण युतो ऽत्र
वारः ॥ ज्ञातुंयदीष्टा नग ७ वासरा
न्ते ग्रहास्तदा सप्त समन्विता स्ते ॥ ३२॥
मेषप्रवेशप्रभवातलाङ्कैलता मुहुस्सप्तदि
नान्तरे स्यात् । मधोःसितादेस्तिथयस्त्व
वेदरसांश ६४ हीना दिनसञ्चयःस्यात्
॥ ३३ ॥ तेनान्विता दर्शसमीपगा साप्र
साधिता खेटलतातलाङ्कै॥इष्टेदिने स्या
दथ सप्ततष्टःप्राग्वारयुक्तोद्युगणोऽत्रवारः
॥ ३४ ॥ कदाचिदेषातलसंस्थिताङ्केसै
कानिरेकासुधियाविधेया ॥ ३५ ॥

पूर्वोक्तरीत्याशकयोर्वियोगइति॥एषांव्या
ख्या॥इष्टशकमध्ये पुस्तकीयश केशोधि
तेयच्छेषंतत्प्रमित कोष्ठादधस्थांकमध्ये पु
स्तकीयशका दधस्थाङ्कोयोज्यस्तदधस्थ
वारयोर्योगःकार्यस्तदा रव्यादिवर्त्तमानो
वारोज्ञेयः॥एवं कृतेसतीष्टवर्षात्प्रथमवर्षे
फाल्गुनपौर्णमास्युत्तरंयामावास्यामागत

Indira Gandhi National Centre for the Arts

बारे ऽर्द्धरात्ररुमये ग्रहदिनवल्ली भव
ति । कदाचित्पूर्व पर दिवसेभवति।यस्मि
न्दिनेआगतवारो भवतितस्मिन्दिनेग्र
हवल्लीज्ञेयेत्यर्थः ॥ अत्र बारस्यैव प्राधा
न्यम् । तदनन्तरमेतद्वल्लीस्थदिनमारभ्य
मेषसंक्रान्ति दिनपर्यन्तमन्तरालदिवसै
र्वल्लीचतुर्थाकोयुक्तःकार्यः । सामेषसंक्रा
न्त्याऽवर्द्धरात्रिसमयेग्रहवल्ली भवति । मे
षसंक्रान्तिवल्लीचतुर्थाङ्केसप्त ७ योज्याः
सासप्तदिनान्तरेवल्लीभवति ॥ एवमग्रे
पि ॥ अवधिस्थवल्ल्युपरिमध्यमावीजसं
स्कृताःस्पष्टाश्चग्रहाःसाध्याः ॥ अथवामे
षसंक्रान्तिदिवसे मध्यमाग्रहाःसाध्याः ।
ते देशान्तरवीजसंस्कृताःकार्याः । तेषुस
प्तगुणिताःस्वस्व गतयोयोज्यास्तेऽग्रिमाव
धिस्था भवन्ति ॥ एवमग्रेऽपि ॥ अथा
त्रयस्मिन्मासे यस्मिन्पक्षेग्रहसाधनमपे
क्ष्यते । तदातत्तत्पक्षचालनानिप्रथमग्र
हदिनवल्ल्यांयोज्यानि । एवंकृतेतत्तत्पक्षे
मासेवाग्रहदिनवल्लीभवति। अथवायस्मि
न्दिने ग्रहसाधनमपेक्ष्यतेतोवाद्विर्दिनैर्व

ल्लीचतुर्थांकोयुक्तः । तावद्विर्दिनै र्वारोयुक्तःसप्ततष्टःकार्यः । एवंकृतेबल्लीस्थबारःसैवेष्टबारस्तदाभीष्टदिन ग्रहवल्लीभवतियदाभीष्टवारोनायातितदादिन द्वयेनैकेनादिनेनबल्ली चतुर्थाङ्कोयुक्तरहितेकार्यैयथाभीष्टबारोभवतीत्यर्थः। पक्षबल्लीसंस्कारश्चैत्रशुक्लप्रतिपदमारभ्यवर्त्ततेइयं बल्लीपूर्वमेवचतुर्दश्यामथवामायां वाआयातीतिकारणादयंसंस्कारउक्तः ॥ अथबारानयनम्॥ग्रहबल्लीषष्ट्या। ६० सवर्णिताकार्याऽहर्गणोभवति । पश्चात्सप्ततष्टेयच्छेषंतत्प्रमितशुक्रवारमारभ्य वर्त्तमानोवारोज्ञेयः । अत्रोदाहरणम् ॥ शके १५३४ वैशाख शुक्ल १५ सोमेग्रहसाधनंक्रियते ॥ इष्ट शक १५३४ मध्येपुस्तकीयशाके १५१४

---

॥ * अथ प्रकारान्तरेणाहर्गणानयनम् ॥

कल्यादव्दगणः प्रभाकरहत श्चैत्रादिमासै र्युतः ।
त्रिघ्नः खाद्रिहताग्नियुक्सुरहतैर्लब्धाधिमासैर्युतः ॥ ख
त्रिघ्नःसतिथिस्त्रिधाशिवहतै स्त्रिव्योमशैलोद्धृतैः । ही
नोलब्धदिनावमैःसितनिशा र्द्दैसावनोऽहर्गणः ॥
अहर्गणः षष्ठिहतावशेषोवल्लीचतुर्द्धादिनजाग्रहाणाम् ।

शोधितेशेषं २० शेषादधस्थाङ्काः।०।
२।२।४ वारः २ शकादधस्थाङ्काः ७
।५६।५२ वारश्च ५ अनयोर्योगः ७।
५८।१०।५६ वारयोर्योगः ७ सप्ततष्टः
।०।शनिवारेजातावल्ली ७।५८।१०।५७
एतन्मध्ये वैशाखशुक्लपौर्णमासीस्थपङ्क्ति
वल्ली ०।०।०।४४ युताजातावैशाखशुक्ला
१५ र्द्धरात्रिसमयेग्रहवल्ली ।७।५८।११।४
१ वारेषु०वारौ २ युक्तो २ जातःसोम
वारः। इयंग्रहवल्लीरव्यादिसर्वग्रहसाध
नोपयोगी ॥ परञ्चात्रेदमवधेयम् ॥
प्रथमञ्चैत्रादि निकटग्रहदिनवल्लीतोव
क्ष्यमाणेनस्वघटिकायामिति श्लोकेनार्कः
साध्यः सयद्यपेक्षितार्कसमस्तदाशुद्धाग्रह
वल्लीनान्यथा। यदीष्टार्कतएकरांशान्यू
नाधिकोभवतितदावल्लीतलाङ्के खरा
मा ३० योज्याःशोध्याः। वारेऽपिद्वय
२ देयंहेयंकार्यम् ॥ अत्रोदाहरणम् ॥
इष्टशके। १५५८ उक्तवज्जातावल्ली ८।
०।३६।३७ वारश्च ५ वल्लीस्थसूर्यः १।०।२
६।४५।२२ अपेक्षितमीनार्कादूनइतिवल्ली

चतुर्थाङ्केखारमा३० योजितातजातावल्ली ८।०।३७।७ द्वाभ्यांयुक्तेजातोवारः।०। एतद्वल्लुग्नस्यसूर्यः ११। १९। २६।२७ अपेक्षितार्कसमइत्यस्मिन् १५५८ शकेचैत्रादितःप्रागमायांशनौजाताशुद्धावल्ली॥ एवमधिकेऽपिज्ञेयम्॥ अतएवोक्तं दिवाकरेण॥ अपेक्षितार्कादितीतिवल्लीसाधनम् ॥

॥ अथ मध्यमग्रहानयनमाह ॥

आभ्यो लताभ्योवहुधागताभ्योवदामि मध्यानयनन्त्विदानीम् ॥ ३५ ॥ स्वल्पक्रियं सौरमतानुरूपाङ्गरूपादिष्टम्वहुशिष्यतुष्ट्यै। स्ववाटिकायांद्युलतातलाङ्कोष्ठेफलंस्थापयपट्टिकायाम्॥ ३६ ॥ ऊर्ध्वक्रमेणात्र ततःफलंयदेकादिकाङ्कम्प्रविहाययोज्यम् । अङ्कंसन्त्यजनसूचकम्वियत्तत्तलस्थितफलन्नयोजयेत् ॥ ३७॥ स्वोपरिस्थितलताङ्कसम्मितिस्त्वन्यथाकुरुमहीविहीनिताम् । वल्ली भवेत्खेटवशाद्विभिन्नाचन्द्रोच्चवल्लीशरवेदयुक्ता ॥ ३८ ॥



Indira Gandhi National Centre for the Arts

ऊर्ध्वांकके केतुलतासमेताचेत्त्रिंशतारा हु
लतामतासा । रसाहताखेटलताभवेयुर्भा
गाविभक्ताः खगुणैर्गृहा णि ॥ ३९ ॥ ते
प्यर्कभक्ताभगणाभवेयुस्समार्जनीया गण
कैः प्रयत्नात् वल्लीशिरोङ्केषु लवांगृहाणि
शेषन्दशाप्तंयदिवालवाद्यम् ॥ ४० ॥ भा
दीनि सिद्धानि फलानि यानि चन्द्रज्ञशु
क्रोच्चकवाटिकातः । तानीहकेन्द्राणिभव
न्तितेषामुच्चानिनैवेत्यवगच्छनूनम् ॥४१॥ तु
गंभवे त्केन्द्रविहीनखेटस्तुङ्गोनखेटःकि
लकेन्द्रमुक्तम् । यन्नीलकण्ठप्रमुखैर्निरुक्त
न्तद्गौरवान्नैवमयानिरुक्तम् ॥ ४२ ॥

---

स्वस्व वाटिकायां बल्ल्यां यश्चतुर्थांक स्त
त्प्रमित कोष्ठकस्थाश्चत्वारोऽङ्काः स्था
प्याः तदनन्तरं बल्लीतृतीयांक तुल्यकोष्ट
कस्थ प्रथमांकं विहाय चत्वारोऽङ्काःस्था
प्याः । ततोवल्लीद्वितीयाङ्कतुल्यकोष्ठक
स्थोद्धांङ्कद्वयंविहाय चत्वारोऽङ्काःस्था
प्याः। ततोवल्लीप्रथमांकतुल्यकोष्टकस्थो

Indira Gandhi National Centre for the Arts

र्द्धांकित्रयंविहायचत्वारोंऽकाः स्थाप्याः । ऊर्द्ध्वांकास्त्याज्याः। ततस्तेषांयोगःकार्यः ऊर्ध्वांकःषष्ट्यधिकश्चेत्तदाषष्टितष्टःकार्यः साग्रहबल्लीघटिकादिका भवति । रवि चन्द्रादिबल्ल्यो भिन्नालेख्याः ॥ अग्रेप्रयो जनत्वात् ॥ तदनन्तरंगृहबल्लीषड्भिर्गु ण्यांऽशादिकं भवति । अंशास्त्रिंशद्भक्ता राशयो भवन्ति ॥ एवमर्द्धरात्रिसमयेरा श्यादिग्रहो भवति । अथ चन्द्रोच्चबुधो च्चभृगूच्चबल्लीनांविशेषः । सयथा । उक्तत्र च्चन्द्रोच्चबल्लीकार्या। तस्याऊर्ध्वांकेपञ्चच त्वारिंश ४५ द्युक्तःकार्यस्तदनन्तरंचन्द्र बल्लीमध्येशोध्यातदनन्तरं षड्गुणिताका र्याचन्द्रोच्चं भवति। यदाबल्लीमध्येवल्लीन शुध्यातितदोर्ध्वांकेषष्टि६० युतांकृत्वाशो ध्या । बुधशुक्रोच्चबल्लीरविबल्लीमध्ये शो ध्या।तदनन्तरंषड्गुणिताकार्या तदाबुध शुक्रयोःशीघ्रोच्चंभवति॥ अथ च ग्रहसाध नानन्तरं रेखास्वदेशान्तरयोजनघ्नीगति रित्यादिनादेशान्तरसंस्कारःकार्यः अर्द्धरा त्रौचराभावाच्चरसंस्कारो न भवति ॥ अ

त्रोदाहरणम् ॥ शके १५३४ वैशाखशुक्ल पञ्चदश्यां १५ वल्ली ७।५८।११।४०। रविवाटिकायांचत्वारिंशत्कोष्ठकादधस्थांकाः ६।३४।१४।२७। एकादशकोष्ठकादधस्थाद्यंकं विहायचत्वारोऽङ्काः ४८।२४। ५८।३१ अष्टपञ्चाशत्कोष्ठकादधस्थांकद्वयंविहायचत्वारोऽङ्काः ३८।५८।२०। ३४ एवमंकत्रयंविहाय सप्तकोष्ठकादधस्थांकाः ३१।५२।८।१४ चतुर्णांयोगेजातारविवल्ली १२५।४९।४१।५४। ऊर्ध्वांके षष्ठितष्टेशेषं ५।४९।४१।५४। इदंषड्गुणं जातोंऽशाद्यः ३४।५८।११।२४। अंशास्त्रिंशद्भक्तालब्धंराशिः १ एवंराश्याद्योरविः १।४।५८।११ चन्द्रवल्ली ३५।२।१२।१२। यथोक्तकरणेनजातश्चन्द्रः ७।०।१३।१२ चन्द्रोच्चवल्ली ५७।४१।६।३७ ऊर्ध्वांकेशरवेद ४५ युक्ताजाता ४२।४१।६।३७ इदंचन्द्रवल्ली ३५। २।१२।१२ मध्ये रहितं जातम् ५२।२१।५।२४ उच्चः १०।१४।३३ ।११।भौमवल्ली।४९।५३।३६।१८। भौमः ९।२९।२३।३८ बुधोच्चवल्ली ५७।३४।

३३।५४ रविवल्ली ५।४१।४१।५४। मध्ये शुद्धाजातंबुधशीघ्रोच्चं २।२५।३०।४८ गुरु वल्ली २१।४३।३१।५८ गुरुः ४।१०।२१।१२ शुक्रोच्चवल्ली ४३।११।३०।१८ रविवल्ली मध्ये शोधितेजातंशुक्रशीघ्रोच्चं ४।१५।११।१९ शनिवल्ली ५४।१७।४१।२ शनिः १०।२५।४६।६ केतुवल्ली ३७।३०।४४।४१ केतुः ७।१५।४।२८ अयंराशिषट्कयुक्तोजातोराहुः १।१५।४।२८ अथवाकेतुवल्लयामूर्ध्वांकेत्रिंशता ३० युक्तोराहुवल्लीभवतितस्याराहुः॥ अथ देशान्तरसंस्कारः क्रियते। काश्यांदेशान्तरयोजनानि।६४। ऋणानि ॥ रेखा स्वदेशान्तरयोजनघ्नीत्यादिना। देशान्तर कलाः ४७ तत्संस्कृतोऽर्कः १।४।५७।२४। चन्द्रः ७।०।२।४० उच्चं १०।१४।६।३८ भौमः ९।२९।२१।१३ बुधोच्चं २।२५।२७।३१ गुरुः ४।१०।२१।१८ शुक्रोच्च ४।१४।५८।५३। शनिः १०।२५।४६।५ राहुः १।१५।४।३०। ॥

॥ अथ ग्रहाणांबीजान्याह ॥

शकोऽङ्कसप्तेन्दुगुणाख्यसमेतः समागणःस्या

त्कलितः प्रयातः । खबाणसप्तोद्धृतएषवी
जम्बुधाशुकेन्द्रस्यलवाद्यमस्वम् ॥ ४३ ॥
दलीकृतन्तद्गुरुवीजमस्व न्निजांघ्रिहीन
ङ्कविकेन्द्रशन्योः । धनन्त्वमीभिःपरिसं
स्कृतास्तेदृग्गोचराःस्युर्विदुरेवमाद्याः॥४४॥

---

त्र्यको ऽङ्कसप्तेन्दुगुणा स्समेत इति ॥
इष्टशक ।१७५३४। मध्ये नवसप्तेन्दुरामा
३१७९योजितेजातंकलिगतम् ॥ ४७१३
कलिगतस्यसहस्त्रांशों १००० ऽत्रा।दिकं
शनिवीजं ४।४२।४६ धनम्। एतत्त्र्यंशेन १
।३५।१५ सहितंजातंवुधोच्चे धनम् ६।१७
।१। शनिबीज ४।४३।४६ त्र्यंशेन १।३४।१
५ रहितंजातमृणं ३।८।३१ गुरोः । श
निवीजमृणंकृत्वाशुक्रोच्चस्यभवति ।४।४२
।४६ वीजसंस्कृतंबुधोच्चं ३।१।४४।३२ गु
रुः ४।७।१२।३७।शुक्रोच्चं ४।१०।१७।७। श
निः ११।०।२८।५१। अथकश्चिद्विशेषउच्य
ते । यदाग्रहदिनवल्लीचतुष्टयाङ्कोऽपिशू
न्यमायातितदाग्रहसाधनंकथंकार्यमिति।
यतोग्रहवाटिकायांशून्यकोष्ठकानास्ति।

Indira Gandhi National
Centre for the Arts

आदौ शून्यकोष्ठकमस्तिचेत्तत्रशू न्यस्था
नेषष्ठिर्वर्त्तते। स्मात्कारणाच्छून्यकोष्ठक
स्याभावाच्छून्यस्थाने फलाभावः। तत्रां
कत्रययोगेग्रहबल्लीभवति । बाटिकाया
मङ्कग्रहणेशून्यस्थाने। एकैकमङ्कंविहा
ययोज्यमित्यनुवर्त्तते । यदाशू न्यस्थानेष
ष्ठिघटिकास्थाप्यंतेतदाशू न्यकोष्ठ काद
धस्थांकोग्राह्यः। एवमङ्कचतुष्टययोगेग्रह
बल्ली भवति ॥ एवंप्रकारद्वयेऽपितुल्याब
ल्लीभवति । अत्रोदाहरणम् ॥ कल्पतो
बल्ली ७।५८।०।४० रविवाटिकायांचत्वा
रिंशात्कोष्टकादधस्थांकः। ६।३ ४।१४।२७।
अष्टपञ्चाशात्कोष्टकादधस्थांकः।३८।५
८।०।३४ सप्तकोष्ठकादधस्थांकः ३१।५
२।८।१४ एषांयोगेजाताबल्ली १७।२४।४
३।१५ अथवा ग्रहदिनबल्ली ७।५७।६०।
४० चत्वारिंशात्कोष्ठकादधस्थांकः।६
।३४।१४।२७।शून्यकोष्ठकादधस्थांकः।५१
।२३।४१।४४ सप्तपंचाशात्कोष्ठकादधस्थां
कः ३१।५२।८।१४ एषांयोगेजातासैवबल्ली
१७।२४।४३।१५ एवंसर्वग्रहेषुशू न्यस्थाने

शून्यकोष्टकस्थफलंचेद्गृह्यतेतदेयंवल्लीसंपद्यते । ८।४६।२४।५१ तस्मादियमशुद्धा एतदुत्पन्नरवेर्विसंवादात् । यद् वल्लग्रामंकत्रयेशून्यं तदोर्ध्वांकप्रमितकोष्ठकस्याधस्थांकमध्येऽङ्कत्रयंत्यक्त्वाचत्वारोङ्काग्राह्याःसैवग्रहवल्ली ॥ ॥ श्री: ॥

अथ मेषसंक्रान्तिदिनज मध्यमग्रहेभ्यः प्रत्यवधिज मध्यमग्रहानयनमाह ॥

राश्यादिकाभिर्गतिभिर्निजाभिर्नगाहताभिर्मुहुरन्विता स्ते ॥ ४५ ॥ स्वबीजसंस्कारितमध्यखेटास्समादिजास्सप्तदिनान्तरेस्युः । खगोच्चभुक्त्योर्विवरंगतिस्यात्केन्द्रस्यकेन्द्रेज्ञभृगोर्विधेयाः ॥ ४६ ॥ विशोधनीयासितचान्द्रकेन्द्रे मध्यौतुमध्यार्कसमौसितज्ञौ । पञ्चेन्दुघस्राधरसंस्थभुक्तिः राश्यादियुक्ता यदि वा तदन्ते ॥ ४७॥ इतिमध्यमाधिकारःसमाप्तः ।

स्पष्टार्थाः।इतिमध्यमाधिकारोदाहरणम्

॥ अथ स्पष्टाधिकारः ॥

अथ स्फुटानां द्युगनेचराणां संसाधनम्ब
च्मिगुरूपदेशात् । स्यान्मन्दकेन्द्रम्मृदुतु
ङ्गहीनंखेटस्तुलाजादिगतेचकेन्द्रे ॥ ४८ ॥
फलंस्वमस्वंखचरेविधेयम्भुजस्त्रिभोनन्त्र्य
धिकोनषड्भम् ॥ अङ्कोर्द्ध्व मङ्कानित मर्कशु
द्धत्वत्राधिकं स्यादथ भास्करेन्द्वोः ॥ ४९ ॥
केन्द्रस्यदोर्भागसमानकोष्ठे फलंतदेष्या
न्तरलिप्तिकाभिः। हतस्यशेषस्य खतर्कभा
गसम्प्राप्तलिप्तादियुतम्विधेयम् ॥ ५० ॥
लवादिनातेनदिवाकरेन्दू संस्कारितौस्प
ष्टतरौ भवेताम् ॥ तत्कोष्ठकाधोगतिजं
फलंयत्कलादिकर्क्यादिमृगादिकेन्द्रे॥५१॥
स्वमध्यभुक्तौ स्वमृणंविधेयङ्गतीभवेताम
नयोःस्फुटेते । मध्यार्कहीनाःकुजसूरिसौ
राःकेन्द्रञ्चलम्प्रागुदितंज्ञभृग्वोः ॥ ५२ ॥
प्रागुक्तरीत्याकुरुमन्दकेन्द्रञ्चलञ्चमान्दं
रसभाधिक ञ्चेत्।चक्राच्च्युतन्तल्लवतुल्य
कोष्ठेफलन्तदेष्यान्तरलिप्तिकाभिः ॥५३॥

हतस्य शेषस्य खतर्कं ६० भागसंप्राप्तलि
प्रायुतहीनमेष्ये । फलेऽधिकेल्पे भवतिस्फु
टन्तत्स्फलंलवाद्यम्मृदुचञ्चलञ्च ॥५४ ॥
मध्येचलार्द्धं कुरु तन्नमान्ददलन्तु त
त्रैव ततोऽपिमान्दम् । मध्ये खिल
म्मन्दखगोत्रतज्जञ्चलं स्फुटस्स्यादिति
शास्त्रमार्गः ॥ ५५ ॥ शीघ्रार्द्धसंस्का
रित मध्यमोस्य समग्रमान्दङ्कुरु मध्य
खेटे ॥ शीघ्राख्यकेन्द्र पि च तत्फलेन
संस्कारितो मन्दखगः स्फुटस्स्यात् ॥५६॥
कृताशुखण्डे मृदुखण्डमुक्त न्तदत्रमान्दे
खलुपर्यणंसीत् । अतः पुनर्मन्द फलार्द्धं
दानमसाम्प्रतं सम्प्रातिसम्प्रतीम ॥ ५७ ॥
अतएवाहुः श्रीमद्विष्णुदैवज्ञाः ॥ प्राग्द्रा
ग्गृहःप्रार्थयते फलार्द्धं पश्चा त्स मान्दं
सकलं वृणीते । पुनस्ततो द्रागपिसर्वमे
तद्बुभुक्षितो भिक्षुरिवातितिक्षुः ॥ ५८ ॥

॥ अथ भौमादीनांगतिसोधनम् ॥

मान्दाङ्कविश्लेष कलाहत्तायागुहस्य
भुक्तेः खरसैरवाप्तम् ॥ ऋणंधन म्पूर्ववदे
वभुक्तौमन्दस्फुटास्याश्चलतुङ्गभुक्तेः॥५९॥
शोध्यास्त्रशेषश्चलकेन्द्रभुक्ति श्चलाङ्क
विश्लेषहताःखतर्कैः ॥ भक्ताप्तलिप्तादि
विहीनयुक्ताक्रयेचये मन्दगतिः स्फुठा
स्यात् ॥ ६० ॥ गतेर्मृदुफलेनोनयुक्ताक
र्किमृगादिके ॥ ज्ञशुक्रकेन्द्रजाभुक्तिस्सप
ष्टाशेषंम्पुरोक्तवत् ॥ ६१ ॥ ऋणम्बहुत्वा
द्युतिज न्नशुध्येत्फलन्तदास्पाद्विपरीतशु
ध्या । वक्रागतिर्वक्रमुखाःप्रयान्तिवक्रं
स्फुटैश्चलकेन्द्रभागैः ॥६२॥ रसाङ्क
भूभी १९६ । रसचन्द्रदस्रै २१६ रम्राग्नि
दस्रै २३० नगनन्दभूमिः १९७। शराब्धि
दस्रै २४५ रथयान्तिमार्गन्तैरेवभागैः
खरसाग्नि ३६० शुद्धैः ।१६४।१४४।१३०।१
६३।११५ ॥६३॥ वक्रम्प्रयान्तोनहिपुष्यव
न्तौवक्रादयोवक्रगतिंप्रयान्ति।चवशोघ्रो

न्तोननुयुक्तमेतदङ्क्ति प्रहीनःकुटिलत्वमे
ति ॥ ६४ ॥ भूजजीवरविजागजाश्वि
भि २८ । वेदभू १४ । म्युरगभूभि ।१७।
रंशकैः । प्रत्यगस्तमुपयांति पूर्वदिश्युद्ग
मम्भगणभाग ३६०शोधितैः ३३२।३४६।
३४३॥६५ पञ्चपञ्चकुभि १५५ रद्रिपर्वत
क्ष्माभि १७७रैन्दुग्रदयिनौज्ञभार्गवौ।पूर्ण
चन्द्रदहनै ३१० रसामरै ३३६ दर्शनंज
लपतेर्दिशिस्मृतम् ॥ ६६ ॥ एभिरेवभग
णांश ३६० शोधितैः २०५।१८३।५०।२४
पश्चिमेन्द्रककुभोरदर्शनम् ॥ वक्रादिकं
प्रोक्तलवाधिकोनाः कलाविभक्ताश्चलके
न्द्रभुक्त्या ॥६७॥ लब्धद्युक्रमेणावधिवास
राद्येयुतोनितम्वक्रमुख ञ्चतत्र ॥ वक्रा
दिकं स्थूलमिदम्मयोक्तंसुखार्थमेवेतिनत
द्यथार्थम् ॥ ६८ ॥ वक्रस्यमार्गस्य गतेरभा
वेप्रवृत्तिरेवञ्चवदन्तिसन्तः । अस्तोद
दयौरपष्टतरौ प्रसाध्यौसिद्धान्तरीत्याकु

सुतादिकानाम् । यद्वात्रशुक्रांगिरसौप्र साध्यौविवाहयात्रादिकनिर्णयार्थम्॥६१॥

अथस्फुटानामिति ॥ एषांपद्यानांव्याख्यारूपमुदाहरणम् ॥ तत्रतावद्रवीन्द्वोः स्पष्टीकरणम् । रविमन्दोच्चं रविमध्येनोनं यंमन्दकेन्द्रं भवति । तस्यभुजांशाःकार्याभुजांशतुल्यकोष्टकादधस्थं भागाद्यंफलंग्राह्यम् । तस्याग्रिमकोष्ठकस्थफलेन सहान्तरंकार्यं । तेनान्तरेणभुजांशकादधस्थंकलाद्यं गुण्यंषष्ठ्याभक्तंफलं कलाद्यंग्राह्यम् । एताःकलाः पूर्वस्थापितफलेसहिताःकार्या अग्रिमफलस्याधिकत्वात् । अंशाद्यंमन्दफलंभवति । मेषतुलादौकेन्द्रेफलमृणंधनंचज्ञेयम् ॥ अनेनसंस्कृतोरविःस्पष्टोभवति । अथगतिसाधनम् । फलादधस्थंकलाद्यगतिफलं ग्राह्यम् । तदग्रिमान्तरेण भुजांशादधस्थं कलाद्यंगुण्यषष्ट्याभाज्यफलंकलाद्यं ग्राह्यं । एताःकलाःपूर्वस्थापितगतिफलकलामध्येसहिता रहिताःकार्याअग्रिमकोष्ठकवशात् । इदं स्वकीयमध्यगतौ कर्किमृगादिकेन्द्रेधनर्णं



Indira Gandhi National
Centre for the Arts

कार्यं तदाऽसागतिःस्पष्टा भवति ॥ अनया रीत्याचन्द्रस्पष्टीकरणम्। अत्रोदाहरणम् ॥ रवेर्मन्दोच्चं राश्यादिकम्। २।१७।१७।० रवि मध्येरहितंजातंरविमन्दकेन्द्रम् ।१०।१७।४ ०।२४ स्पष्टभुजांशाः ४२।१। ३६ द्विच त्वारिंशत्कोष्ठकादधस्थंफलं १।२८।३ अ ग्रिमकोष्ठकस्थफलेनसहान्तरं । १४ ३ अ नेनकलाद्यं गुणितं ३३।३८। षष्ठिभक्तंफ लंकलाद्यम् ।०।३३।३८ इदंपूर्वस्थापित फल१।२८।३।मध्ये सहितंजातंरवेर्मन्दफल मंशाद्यम् ।१।२८।३६। तुलादिकेन्द्रत्वाद्धन म् । अनेनसंस्कृतःस्पष्टोऽर्कः १६।२६।० कलादधस्थंगतिफलम् । १।३८। अग्रिमा न्तरेणविकलात्मकेन कलाद्यं ११।३६ गु णितं ३१। १२ षष्ठिभक्तंफलं ।१। अग्रि मांकस्यन्यूनत्वाद्गतिफलमध्ये १।३८ रहि तंजातं गतिफलं ।१।३७ मकरादिकेन्द्र त्वाद्धणं । अनेनमध्यमागतिः ५९।८ सं स्कृताजातास्पष्टागतिः ५७।३१। अथच न्द्रस्पष्टीकरणम् ॥ चन्द्रोच्चं १०।१४।६।२८ चन्द्र७।०।२८।४० मध्येशोधितेजातंचन्द्रम

न्दकेन्द्रम् ८।१५।५६।१२ अस्मादुक्तवन्म
न्दफलं धनम् ।१।५३।५३ अनेनसंस्कृ
तोजातस्पष्टश्चन्द्रः ७।४।५६।३३ गति
फलं १६।५७ धनमनेनसंस्कृतामध्यग
तिः ।७९०।३५ जातास्पष्टाचन्द्रगतिः।
८०७।३२ अथ भौमादीनांस्पष्टीकरण
म्। तत्रभौमगुरुशनीनांशीघ्रोच्चंमध्य
मोरविः। वुधशुक्रयोःपूर्वंसाधितमस्ति
योमध्यमोरविःस एववुधशुक्रौ। ग्रहम
ध्येहीनंशीघ्रोच्चंशीघ्रकेन्द्रं भवति। षड्
भाधिकंद्वादश १२ शुद्धंषड्भान्यूनंयथा
स्थितमेवतस्यांशाःकार्याः। अंशादधस्थ
शीघ्रफलं भागाद्यंस्थाप्यम्। ततोऽग्रिमा
न्तरेण कलाद्यंगुण्यंषष्ठिभक्तंफलंकलाद्यं
ग्राह्यं। तत्फलंपूर्वस्थापितफलमध्येरहि
तंसहितंकार्यम्। अग्रिमकोष्टकवशात्।
तदंशाद्यंशीघ्रफलंमेषदा वृणंतुजादौधन
म्। अस्यार्द्धेनमध्यमःसंस्कृतःकार्यःस
शीघ्रफलार्द्धसंस्कृतोभवति।तदनन्तरमे
तन्मध्यमन्दोच्चंशोध्यंमन्दकेन्द्रंभवति।
षड्भाधिकं चक्राच्छुद्धंतस्यांशप्रमितकोष्ठ

Centre for the Arts

कादधस्थमशाद्यमन्दफलं ग्राह्यम् ।अग्रि
मांतरेणकला द्यगुण्यंषाष्ठभक्तं कलाद्यंफ
लंपूर्वस्थापितफलेधनर्णंकार्यमग्रिमकोष्ठ
कवशात् । तदंशाद्यंमन्दफलंभवति ।
इदंफलंसंपूर्णंमध्यमग्रहेसंस्कार्यः समन्द
स्पष्टोभवति। इदंमन्दफलंपूर्वस्थापितशी
घ्रकेन्द्रे यथास्थितंदेयंतदा द्वितीयशीघ्रके
न्द्रंभवति । अथवाशीघ्रोच्चं मन्दस्पष्टग्र
हेशोध्यंशीघ्रकेन्द्रं भवति । अस्मात्पूर्ववं
च्छीघ्रफलंकार्यम् । तन्मन्दस्पष्टग्रहेदेयं
हेयंकेन्द्रवशात्तदास्पष्टग्रहोभवति॥ अथग
तिसाधनम्॥मन्दफलसाधनेयन्मान्दांका
न्तरंतेनस्वीयागतिर्गुणयेत्षष्ठ्या। भजेत्फ
लंकलाद्यंतत्स्वगतौमृगकर्क्यादिकेन्द्रवशा
दृणधनेकार्येसामन्दस्पष्टागतिर्भवेत्। अ
नयोनाशीघ्रोच्चगतिःशीघ्रकेन्द्रगतिर्भव
ति॥अन्तिमशीघ्रफलसाधनेयच्छीघ्रान्त
रंतेनशीघ्रगतिर्गुण्याषष्ट्या ६०भाज्या।फ
लमग्रिमकोष्ठकवशान्मन्दस्पष्टगतौधन
र्णंकार्यंसास्पष्टागतिर्भवेत्। विपरीतशो
धनाद्वक्रागतिर्भवति ॥ उदाहरणम् ॥

भौम ९।२९। २१।१३ मध्ये रविः १।४।५
७।२४ शोध्यस्तस्यशीघ्रकेन्द्रं ८।२४। २३।
४९ षड्भाधिकोद्वादशशुद्धः ३।५।३६।
११ अस्यांशाः १५ ३६।११ पूर्ववच्छी
घ्रफलंधनं ३४।२२।३८ अस्यार्द्धेन १७।
११।१९ संस्कृतोभौमः १०।१६।३२।३
२०तन्मध्येऽस्यमन्दोच्चं ४। १० शोधितं
मन्दकेन्द्रं ६।६। ३२।३२ षड्भाधिकत्वा
च्चक्रतःशुद्धं ५।२३।२७।२८ मन्दफलंधनं
मध्यभौमेदत्तंजातोमन्दस्पष्टोभौमः। १०
१०।५८।४९ तन्मन्दफलंप्रथमशीघ्रकेन्द्रे
धनंकृतंद्वितीयशीघ्रकेन्द्रं ८।२५। ३।२५
अस्मात्प्राग्वच्छीघ्रफलंधनं ३३ ५८। ४६
शीघ्रफलसंस्कृतोमन्दस्पष्टोजातः स्पष्टो
भौमः।११।४।४९।३४ अथगतिस्पष्टीकर
णंमान्दांकान्तरेण १४ गतिर्गुणिता ४४
०।४षष्ठिभक्ताफलंकर्कादिकेन्द्रत्वाद्धनम्
३१।३६ अनेनसंस्कृतामध्यमागतिः ७।२६
जातामन्दस्पष्टागतिः ३८।४६ अनेनो
नाशीघ्रोच्चगति ५९।८जाताशीघ्रकेन्द्रग
तिः।२०।२२ इदंशीघ्रांकान्तरेण १६ गु

ष्टःशुक्रः १।५।४६।४१शीघ्रकेन्द्रं ८।३५।
२१।४३शीघ्रफलंधनं ३७।२४।६ स्पष्टः
शुक्रः २।१३।१०।५५मान्दांकान्तरम् २
मन्दस्पष्टागतिः ५७।१० शीघ्रकेन्द्रग
तिः ३८।५१ शीघ्रांकान्तरं ।२०।शीघ्रग
तिफलंधनम् १२।५१ स्पष्टागतिः ७०
।९। इतिशुक्रः ॥ अथशनिस्पष्टीकरण
म् । शीघ्रकेन्द्रं १।२५।३१।२७ शीघ्रफ
लार्द्धंधनं २।४३।२७ मन्दस्पष्टःशनिः
११।३।१२।१०मन्दोच्चं ७।२६ मन्दकेन्द्रं
३।७।१२।१८ मन्दफलमृणम् ७।३८।४८म
न्दस्पष्टःशनिः१०।२२।५०।६।द्वि०शीघ्रके
न्द्रं१।१७।५२।३१शीघ्रफलंधनम् ५।४८।
२२स्पष्टःशनिः १०।२८।३५ मान्दांकान्त
रम् १ मन्दस्पष्टागतिः २।२ शीघ्रकेन्द्र
गतिः ५७।६शीघ्रांकान्तरंधनम् २।५१
स्पष्टागतिः ४।५३ ॥ इति ॥ श्रीः ॥

अथ भौमादीनांवक्रमार्गोदयास्तसाध
नम् । अंतिमशीघ्रफलसाधनेयच्छीघ्र
केंद्रंतस्यचक्रशुद्धस्यांशाःकार्याःप्रोक्तांशा
नामिष्टांशानांचशाम्येतस्मिन्नेवदिनेग्र

क्रादिकंस्यात् । न्यूनाधिकेदिवसाद्यान यनं । प्रोक्तांशानामिष्टांशानाञ्चांतरंक लाःकार्याःशीघ्रकेंद्रगत्याभाज्या । लब्धं दिनघटीपलाद्यंग्राह्यम् । प्रोक्तांशेभ्यइ ष्टकेंद्रांशा अधिकास्तदा लब्ध्याच्चावधिस्थं वाराद्यंरहितंकार्यंन्यूनेसहितंतद्वारघठीपले षुचक्राद्यं स्यादितिग्रहस्पष्टीकरणम् ॥

---

अथ सौरभोपरि किंचित्स्थूलंरव्यादीनां स्पष्टीकरणमाह ॥—

स्याद्वाठिकोत्थोघटिकादि खेटः कन्दा भिधः शोधयसूर्यकन्दे । कन्देषुमंदेज्यम हीसुतानां लताःस्मृतास्तागणितागमज्ञैः ॥ ७० ॥ ज्ञशुक्रकंदौ रविकंदतुल्यौज्ञशुक्र सोमोच्चसुघाटिकातः । फलानि नाडीप्रमु खानि यानिप्रोक्तानि तान्येवलताभिधा नि॥ ७१ ॥ मार्त्तण्डकंदघटिका समकोष्ठ कस्थंयतस्यात्फलंतदगतांतरशेषघातात् । षष्ट्याप्तयुक्स्फुटतरस्तरणिः शशांकवी रुद्घटीस्थितफलंशशिकंदयुक्तम् ॥ ७२

स्पष्टेन्दु रङ्गगुणितावथतौलवाद्यौयत्सानु
पातमथसोमलताघटीस्थम् । भुक्तेःफलं
रसगुणंलव पूर्वकंतत्षाष्ठघ्नमिंदुकलिका
दिगतिः स्फुटास्यात् ॥ ७३ ॥ गम्यंफलं
गतेनोनभूर्विश्लिष्टंकलीकृतम् । तेनोनयु
ग्त्रेभुक्तिःस्पष्टारूपेधिकेऽल्पके ॥ ७४ ॥
वल्लीघटीकोष्टकजंफलंयत्स्व कंदयुक्स्या
दुपकंदसंज्ञम् । एतत्फलेनाथयुतौलता
ख्याकंदौ भवेतां सुलता सुकंदौ ॥ ७५ ॥ सु
कंद युक्तंसुलताफलंयत्पुष्पंदशोनंमकरंद
संज्ञम्।रसाहतंतत्खचरःकुजादिःस्यात्सौर
भैःस्पष्टतरोलवादिः ॥ ७६ ॥ अत्रोपकं
दफलयोर्विवरंगतिघ्नंभुक्तौचयेयुतमथाप
चये विहीनम् । स्यान्मदभुक्तिरियमूनच
लोच्चभुक्तिंतत्केंद्रभुक्तिमपि भुक्तिविदोव
दंति ॥ ७७ ॥ तयासुवल्लिकाफलांतरघ्नया
युतायुता । चयेऽचयेमृदुस्फुटांस्फुटाम
हीजनोजगुः ॥ ७८ ॥ विश्व्यंशपञ्चाग्नि
भि ३।१।५० रष्टरामैः ३८ सत्र्यंशपू

र्णाब्धिभि ४०।२० रक्षरामैः। व्यङ्गांशकै ३४।
५० व्यंङ्गुलवैस्त्रिवेदैः ४३ । ५० र्वक्रंतदू
नाब्धिरसै ६४। रवक्रम् ॥ ७१ ॥ त्र्यंशो
नैर्गिरिभिः ६। ४० सतर्कलवगैस्तर्कांग्नि
भिः ३६। १० । द्व्यंशयुग्वेदैः ४ । २० सा
र्द्धरदै ३२।३० र्विषङ्लवशरै ४।५० भौ
माद्योस्तंपरे । तद्धीनांत्वधिष्णामतासु
६४ सुलतानाडीषुपूर्वोदयम् सत्र्यंशैर्दश
भि १०।२। र्बुधोरसमितैः ६ शुक्रोस्त
मैन्द्र्यांव्रजेत्॥८०॥अत्रतयोःपरोदयइति॥

---

रूपाद्घाटिकोत्थोघटिकादिखेटइति ॥
प्रथममभीष्टदिवसेप्रोक्तवद्गृहवल्लीसध्या
तदुपरिस्वस्वघटिकायांघटिकादि ग्रहः
कार्यः । तस्य कन्दइतिसंज्ञा कार्या । त
दनन्तरंदेशान्तरसंस्कारःकार्यः। सयथा ।
यस्यग्रहस्यकलात्मकदेशान्तरंतत्षड्भिर्भ
क्तंपलात्मकफलंघटिकादिग्रहस्यपलस्था
नेधनर्णंकार्यंदेशान्तरवशात् । यस्यविक
लात्मकं देशान्तारंषड्भक्तंविपलात्मकेन

फलेनपलस्थानेधनर्णंकार्यम् । देशान्तर
वशात् । तदनन्तरमब्दबीजसंस्कारःका
र्यः । सयथा अंशादिबीजंषड्भिर्भाज्यंघ
टिकादिफलेनघटिकादिग्रहःसंस्कार्यः ।
एतदादौकृत्वापश्चात्स्पष्टीकरणम् ।तत्रा
दौरवेः । सूर्यकन्दस्यघटीतुल्यंरविसौर
भस्यकोष्ठकादधस्थंघटिकादिफलंग्राह्य
म् । अग्रिमान्तरेणशेषंगुण्यंषष्टिभाज्यं
पलात्मकेनफलेन पूर्वस्थापितघटिकादि
पलस्थानेयुतंकार्यम ग्रिमकोष्ठस्याधिक
त्वात् ।एवंकृतेघट्यादिस्पष्टोरविर्भवति
। तदनन्तरंषड्गुणंकार्यम् । अंशादिको
भवति । अंशास्त्रिंशद्भक्ताराशयोभवंति
॥ उदाहरणम् ॥ पूर्वानीतरविकंदः । ५
।४१।४३।५४ देशांतरमृणम् ७।५० संस्कृ
तः ५।४१।३४।४ पञ्चकोष्ठकादधस्थं
घटिकादि फलम् । ५।१६।१२ आग्रिमां
तरेण ५८।१७ शेषं४१।३४।४ गुणितं २८८
।८ षष्ठिभक्तंफलंधनम् ।४८।८ अनेनघ
टिकादि फल युतं ६ । ४१। २० षड्गु
णितंजातोराश्यादिस्पष्टोऽर्कः१।१०।८।०

Indira Gandhi National Centre for the Arts

२०। अथ गतिसाधनम्। गतगम्यको
ष्ठकांतरमेकेनांतरंकार्यं।तस्यकलाः का
र्याः। गतगम्यांतरापेक्षयारूपाधिकत्वेर
हितान्यूनेयुता कार्यारवेस्स्पष्टागतिर्भव
ति॥उदाहरणम्।गतगम्यांतरं।०।५८।१७ए
केनान्तरितं ०।१।४३। कलीकृतं १।४३
गतगम्यान्तरापेक्षयारूपाधिकत्वादनेन
हीनारविमध्यगतिः ५।७।२५। अथचन्द्र
स्पष्टीकरणम्। चन्द्रवल्लूर्ध्वांकेपञ्चच
त्वारिंशद्युताजाता। चन्द्राच्चवल्लीतस्यल
ताइतिसंज्ञाकार्यातल्लतोपरिचन्द्रसौरभो
परिस्थंसानुपातंघटिकादिफलंग्राह्यम्।
तच्चन्द्रकेन्द्रेषुयोज्यं तदनन्तरंषड्गुणितं
कार्यन्तदास्पष्टश्चन्द्रोभवति। सर्वत्रानु
पातेषष्ठिर्भाजकः॥ उदाहरणम्॥ लता
४२।४१।६।३७ देशान्तर ०।५० संस्कृ
तालता ४२।४१।५।४७चन्द्रसौरभस्थंद्वि
चत्वारिंशत्कोष्ठकादधस्थंसानुपातंघटि
कादिफलम्। ०।४८।५६।२८ चन्द्रकन्दः
३५।२।१२।७ देशान्तर १।४५।२० सं
स्कृतः ३५।१०।२६।४७ फलेनयुतः ३५।



Indira Gandhi National Centre for the Arts

४।२३।१५ षड्गुणितः स्पष्टश्चन्द्रः ७।४ ५६।१९ अथगतिः । द्विचत्वारिंशत्कोष्ठकादधस्थंसानुपात घटिकादिचन्द्रगतेः फलं २।१४।३५ षड्गुणंजाताअंशाः १३।२७।३० षष्ठ्यागुणितास्पष्टाचन्द्रगतिः कलाद्या । ८०७।३०॥ अथभौमस्पष्टीकरणम्। भौमकन्दमध्येरविकन्दः शोध्योयच्छेषंतस्य लतासंज्ञाकार्या । लतायाघटीप्रमितकोष्ठकादधस्थभौमसौरभस्थंसानुपातंघटिकादिफलंग्राह्यं तत्फलं भौमकन्देषुयोज्यं तदुपकन्दसंज्ञकंभवति । उपकन्दोपर्य्युपकन्दस्थसानुपात घटिकादिफलंग्राह्यं तन्मकरन्दसंज्ञकं । तदनन्तरंषड्गुणितंस्पष्टोभौमोभवति । अनयारीत्यागुरुशन्योः स्पष्टीकरणम् । बुधशुक्रयोस्साधितांकचतुष्टययोगे घटिकादि केन्द्रवल्लीसैवलताज्ञेया । रविकन्दएवबुधशुक्रयोःकन्दौ । अनयोः स्पष्टीकरणंभौमवत्कार्यम् ॥ अत्रोदाहरणम् ॥ रविकन्दः ५।४९।३४।४ भौमकन्दः ४१।५३।३६।१८ देशान्तर ४।१० संस्कृतः ४१।५३।३२।८।

एतन्मध्येरविकन्दः शोधितोजातालता
४४।३।५८।४ लतोपरिप्राप्तंभौरमस्थंघ
टिकादिफलं ४१।१२।७ अग्रिमान्तरेणा
८।२८ नुपातफलं ०।३३।३५ अनेनपूर्वं
फलंसंस्कृतं ४१।११।३३।२५ इदंभौमक
न्दमध्यंयुतंजातोपकंदः ३१।५।५।३३ ए
तदुपरिप्राप्तमुपकंदफलंसानुपातं २।१४
५०।१ अनेनयुक्तोभौमकन्दोजातःसुकं
दः ५२।८।२२।२७ पुनःफलेनयुताजाता
सुलता ४६।१८।४८।१३ सुलतोपरिप्रा
प्तंसुवल्लीफलं १३।३१।४१।५५ अनेनसु
कंदोयुक्तः ६५।४८।४१।१२ दशभिर्हीनो
जातोमकरंदः ५५।४८।४१।१२षड्गुणितः
जातोराश्यादिः स्पष्टोभौमः ११।४।४८
।२५अथ गतिसाधनं । भौमस्योपकंदफ
लयोर्गतगम्ययोरंतरेण गतिर्गुणनीया ।
तन्मांदफलंभवति। इदं मध्यगतौगम्य
स्याधिकत्वेयुतंन्यूनत्वे रहितं।सामंदस्प
ष्टागतिर्भवति ।अनयोनाशीघ्रोच्चगतिः
शीघ्रकेन्द्र गतिर्भवति । इयंसुवल्लीफलां
तरेणगुण्या गतेःशीघ्रफलं भवति ॥ तेन

Indira Gandhi National Centre for the Arts

फलेनगतेरेष्यांकस्याधिकत्वेमंदस्पष्टाग
तीरहिता । न्यूनत्वेसहिता सास्पष्टाग
तिर्भवति ॥ अनयारित्या बुधशुक्रशनी
नां गतिसाधनंकार्यम् ॥ ॥ उदाहरणम् ॥

उपकंद्रफलयोरंतरं । ०।१ ३।२३।ग
ति: ३१।२६। गुणितंजातंमंदफलं०। ष्यां
कस्याधिकत्वादुनं ७।०।४१। अनेनयुता
मध्यगतिर्जाता।मंदस्पष्टागतिः ।३८ ।२७
अनेनरहिताशीघ्रोच्चगति: ५९।८जाता
शीघ्रकेंद्रगतिः २०।४१ इयंचल्लीफलांतरे
ण ०।१६।५५ गुणिताजा तंशीघ्रगतेःफ
लं।०ष्यांकस्यहीनत्वाद्धनं ५।४९।५३ अ
नेनयुतामंदस्पष्टागति जीतास्पष्टागतिः
४४।१७अथबुधस्पष्टीकरणं ॥ लता५१
३४। ३३।५४शीघ्रकेंद्रगतिप्रमाणेनदेशा
न्तरं ०॥२४।५०। संस्कृता वीजमृणं १।२।
५० संस्कृत: ५० ३१ १४ अस्माद्बुधसौर
रभस्थंफलं २४।३४। ८ ।३० अनेनबुधक
न्द ५४९।३४।४ युतोजातउपकंदः ॥
३०।३०।४२।३४ अस्मादुपकंद फलं २
१।४६।३९ अनेनकंदोयुक्तःजातःसुकंदः

७।५१।२०।४३ लतायुता जातासुलता ५२।३३।५।३३ सुवल्लीफलं१०।२३।६।२८ अनेनसुकंद्रोयुक्तः १८।१४।२७।११ द शमिहीनोजातोमकरंदः ८।४।२७। ११ षड्गुणितोजातोराश्यादिःस्पष्टोबुधः ११ १९।२६।४३।गतिसाधनं। उपकन्ददफलयो रतरं ०।५।१ धनंमंदस्पष्टागतिः६४। १२ शीघ्रकेंद्रगतिः ।१८ १।२१ सुवल्लीफलयो रंतरमृणं ०।१२।४७ स्पष्टागतिः १०।२। ५० ॥ अनयारीत्यागुरुशुक्रज्ञानीनामपि साधनं भवति ॥ श्रीरस्तु ॥

अथ भौमादीनां चरणगतिसाधनमाह ॥ भपादभागाधिकहीनखेटः कलीकृतःस्वी यजवेन भक्तः ॥ लब्धोनयुक्तावधिवासरा द्यै भपादवेद्यानृजुगेविलोमम् ॥७१॥

भपादेति ॥ अत्र व्याख्यारूपैवोदाहरण म्। वैशाखशुक्लपञ्चम्यांशनाववधिस्थो भौमः ३।२६।१।३१ गतिः ११।२३ आ श्लेषाचतुर्थचरणेभौमः ३।२६।५० अन योरन्तरकला ३८।२१ अवधिस्थभौम

गत्याभक्ताफलंदिनाद्यंग्राह्यम् १।५।७।४१
इदमवधिस्थवारादौयुतं २।४३।४५ म
पादज भौमादवधिस्थभौमस्य न्यूनत्वा
त्। एवं वैशाखशुक्लसप्तम्यांसोमेसूर्योदया
द्गतघटी४३ पलेषु४५ आश्लेषाचतुर्थचर
णेभौमोजातः। अनयारीत्यासर्वेषांसाध
नम्। यदावक्रीग्रहस्तदाऽवधिस्थवारादौ
योजनवियोजनसमयेविलोमंकार्यं। तद्य
था। यदाचरणगतग्रहोऽवधिस्थग्रहान्न्यू
नस्तदायुतोऽन्यथाहीनइत्यर्थः॥

॥ अथ चन्द्रदर्शनमाह ॥

द्विघ्नद्युमानान्वितरात्रिमानमर्कोदयाद्दर्श
घटीविहीनम्॥ ततोऽल्पकेऽत्रर्कभसंस्थि
तांक श्चेत्यक्रतौदृक्पथमेति चद्रः॥८२॥च
न्द्रोदयःकाललवैः प्रसाध्यः स्पष्टोव्यतिपा
तकवैधृताख्यौ। पातौविधिज्ञार्यगणेश्वरो
क्त्यातिथ्यादिपत्रेनिजजनिश्चयार्थम् ८३॥

द्विघ्नद्युमानेति॥ यस्मिन्मासेशुक्लप्रति
पदि चन्द्रदर्शनमालोक्यतेतस्मिन्मासेतद्दि

नेसूर्योयद्राशावस्ति तद्राशिस्थःसूर्यः । तिर्यक्पंक्तौयस्मिन्कोष्टेभवति। सकोष्ठको ग्राह्यः । तदनन्तरंयस्मिन्राशौराहुरस्ति तद्राशिस्थोराहुश्चोर्द्ध्वपंक्तौ यस्मिन्कोष्ट केभवति तत्कोष्ठकादधस्थो सूर्याभिमुखा घटिकाग्राह्या। तदनन्तरंतस्मिन्दिनेयद्दि नमानंघटिकादिकं। तद्द्विनिघ्नंरात्रिमा नयुक्तंकार्यम् । अस्मिल्लङ्क्यमायायाघटि कास्तायुक्ताःकार्याः । अथवा अमायावि द्यमानघटिकास्ताःषष्ठिमध्येशोध्याः । त दनन्तरंयच्छेषंभवति । तद्दिनजंदिनमानं तन्मध्येयोज्यम् । एवंकृतेयाघटिका भव न्तिताः पूर्वस्थापितघटीभ्यश्चेदधिकास्त दाप्रतिपदिचन्द्रोदृश्यः । न्यूनेऽदृश्यः । किन्तुद्वितीयायान्दृश्यो भवतीत्यर्थः ॥ अत्रोदाहरणम्—सूर्यः ४।२० राहुः १०। १२ अत्ररविःसिंहेराहुःकुम्भे । अनयोः प्राप्तघटिका ८१ अमावास्यायाघटिका १।४० षष्ठिमध्येशोधिताः ५८।२०दिन मानेन ३१।२४ युक्ताः ८९।४४ एताःप्रा प्ताभ्यो८१ भ्याधिकाअतोत्रप्रतिपद्येवचन्द्र

दर्शनंभवति ॥ ॥ श्रीः ॥

अथायनांशसाधनपुरःसरंदिनमानसाधनमाह ॥—

भूलोचनाब्धि ४२१रहितः स्वादिगं १० शहीनःशाकः खतर्क। ६०। विहृतोऽयनभागकाः स्युः ॥ तद्युग्रवेर्लवषडंशसमानकोष्ठे त्रिंशद्युते च दिनरात्रिमिती क्रमात्स्तः ॥ ८४ ॥ ॥

भूलोचनाब्धिरहितइति ॥ इष्टशकःकुयमाब्धिहीनः कार्यस्तदनंतरंस्वदशमांशेन हीनः कार्यः । षष्ट्याभाज्योऽयनांशा भवंति ॥ उदाहरणम् ॥ इष्टशकः १५३४ अनेन ४२१ हीनः १११३ । अयंद्विष्ठोऽस्यदशमांशेन १११।१८ रहितः १००१। ४२ ॥ षष्टिभक्ताजाताअयनांशाः ।१६। ४१।४२ ॥ अथदिनमानसाधनं ॥ स्पष्टः सूर्योयनांश युक्तः कार्यः तस्यांशाःषड्भिर्भाज्याःषष्टिकोष्ठकादधस्थंघट्यादिफलं स्थाप्यं ॥ तद्दिनमानरूपमग्रिम कोष्टकांतरेण शेषंगुण्यं षड्भक्तानिलब्धानि

पलानि ॥ एतानि पूर्वस्थापितदिनमान पलस्थाने ऽग्रिमकोष्टकवशात्सहितानि रहितानिवाकार्याणि । तद्दिनमानंभवेत् । उदाहरणं । सूर्य: १।६।२६।० अयनांशैर्युक्त: १।२३।७।४२ अंशा: ५३।७।४२।षष्टिभक्ता:फलं ८ एतत्तुल्यकोष्ठकस्थंदिनमान ३२।४४ अग्रिमान्तारेण १८ शेषं ५।७।४२ गुणितं ९२।१८।३६। षड्भिर्भक्तंलब्धपलानि । १५ एतान्यग्रिमस्याधिकत्वात् पूर्वस्थापितदिनमानपल मध्ये योजितंदिनमानं ३३।५९ अथप्रकारांतरेणरवे: प्रतिराशिप्रत्यंशोपरिदिनमान साधनं । स्पष्टोर्कस्थाप्य: । अत्रायनांश संस्कारोनास्ति । रवेर्यावंतोराशयस्तदधोयावंतोभागा: संति तत्तुल्यराश्यंश सूर्याद्धस्थं दिनमानंग्राह्यं ॥ अग्रिमांतरेणकलाद्यंगुण्यंषष्ट्याभाज्यं पलात्मकं लब्धंपलस्थाने ऽग्रिमकोष्ठकवशाद्रहितं सहितं कार्यंतद्दिनमानंस्यात् ॥ उदाहरणं ॥ सूर्य: १।६।२६।० एतत्तुल्यसूर्याद्धस्थंदिनमानं ।३३।५ अग्रिमांतरेण ३ शे

षं २६।० गुणितं ७८ षष्ट्याभक्तं फल ५
मनेनसंस्कृतं जातंस्पष्टंदिनमानं । ३३। १

॥ अथ सविशेषं समयसाधनमाह ॥

यत्सायनार्कपदगम्यगताल्पमस्यभागाद्द्वि
निघ्ननिजपंचमभागहीनः । लब्धंक्रुयःस
मपदेविषमेधनंस्याद्रेखापुरस्वनगरांतर
योजनानि॥७५॥ स्वांघ्र्यूनितानृणधनंपर
पूर्वदेशे व्यस्तंचसौरफलमंशमुखं दशघ्न
म् ॥ एभिःफलैः पलमुखै रजनीदलंतत्सं
स्कारितं द्युमितियुक् समयः स्फुटःस्या
त् ॥ ७६॥ प्राक्सा धिताये खचराः स
चाराः कलेत्रजाता उदयांतराद्यैः । सु
संस्कृतास्ते स्वयमेवसुज्ञैः सवासनत्वा
दिति वेदितव्यम् ॥ ७७ ॥ व्यक्षरक्षःपुरी
रेखापुरी याम्योत्तरेक्यतः । न निशीथं
चरं तस्मान्नैवोक्ता चरसंस्कृतिः ॥७८॥
पुरोदित प्रस्फुटकाल यातान् प्रचाल्य
मध्यान् गगनेचरेन्द्रान् ॥ अभीष्टका
लेसुधियाविधेया नभश्चराःस्पष्टतराःस

चराः ॥ ८९ ॥ इतिस्पष्टग्रहाः ॥

स्पष्टार्थाः

॥ अथ नतोन्नतसाधनमाह ॥

यातंच येयं दिवसस्य हेयं देयंतु येयं विगतंरजन्याः ॥ दिवादले प्रागपरंक्रमात्तन्नतं खरामच्युतमुन्नतं स्यात् ॥ १० ॥

या[illegible]चयेयमिति ॥ दिवसस्ययद्गतंयच्छैष्यंतद्दिनार्द्धमध्ये शोध्यंतदाक्रमेणपूर्वपश्चिमनतंभवेत् । रात्रेर्यद्गतैष्यंतद्दिनार्द्धमध्येयुक्तंतदारात्रौ पूर्वपश्चिमनतंस्यात् तत्खाग्निशुद्धंचोन्नतंभवेत् । अत्रोदाहरणम् ॥ सूर्योदयादिष्टम् ।५१। २८ अस्माद्दिनं ३२।४८ विशोध्यरात्रिगतं १८। ४० ॥ रात्रिशेषं ८।३२ एतद्दिनार्द्धेन १६। २४ युतं २४।५६ रात्रौपूर्वनतंत्रिंशच्छुद्धंतं चोन्नतं ५।४ ॥ ॥

॥ अथ दशमलग्नाद्यानयनमाह ॥

यत्केवलार्कलवतो घटिकादि सौम्ये याम्ये सभार्द्ध लवतो। १८० भगुणे ३० रुपे

ताम् । तत्प्राङ्नतेन रहितं सहितं परेण
त्रैराशिकात्तदुपरीष्टलवादिसाध्यम् ॥ ११ ॥
भोर्धांशा १८० धस्थनाडीतो ३२ । ४७ ।
४ धिकं खत्र्यूनितं ततः । ऊर्ध्वस्थांशा
दि खत्र्या ३० प्तं सभार्द्धंमध्यलग्नकम् ॥ १२ ॥
विधाय लग्नं करणोक्तरीत्यातन्मध्यतो
न्यान्कुरु भावसंधीन् । अक्षप्रभावर्गदशां
शकोनात्त्वक्षाहताक्षद्युतिरक्षभागाः ॥ १३ ॥
त्रैराशिकात्सायनबाहुभागकोष्ठेपमांशा
खगगोलकाष्टाः । तत्संस्कृतोयाम्यपलो
नतांशा स्तदूनखांका द्युदलोन्नतांशाः
इतिमध्यलग्नादिसाधनम् ॥

---

यदिति ॥ अदन्नायनांशस्यसूर्यस्यांशाः
कार्याः सौम्यगोलेदक्षिणेतुसषड्भार्कस्यां
शाःकार्याः । तदनन्तरंभागप्रमितकोष्ठ
कादधस्थंघटिकादिफलंग्राह्यं भागादध
स्थंकलाद्यं गतैष्ययोरन्तरेण गुणयंषष्ट्याभ
क्तंघट्यादिफलंपूर्वस्थापितफलेयोज्यं ।
एवंकृतेयद्घटिकादिफलंतदुपरिस्थितमंशा

स्त्रिंशद्भक्ताः फलंराश्यादिकंभवतिषड्रा
शियुतंदशमलग्नंभवति ॥ नतशोधनसम
येयदिनशुद्ध्यतितदात्रिंशद्युतंकृत्वाशोध्य
म्।अत्रोदाहरणम् ॥ सूर्यः २।१४।२१।४पूर्व
नतं २४।५६ सूर्यस्यांशाः ७४। २१।४ अं
शप्रमितकोष्ठकादधस्थंघट्यादिफलं १५।
२३।१८अनुपात फलं।०।३४।७ युतं १५।
५७।२५ नतेनयुतं २०। ३।१५विंशतिघ
टिकासंबन्धीफलमंशा १०२ अनुपात
फलं०।४२।३० तत्रयुतं १०२।४२।३०
अंशात्रिंशद्भाज्याफलंराश्याद्यं ३।१२।
४२।३० सभार्द्धंदशमलग्नम् ९।१२।४
२।३० किंचित्स्थूलम् ॥ करणोक्तरीत्यात
त्कालार्कः सायनःस्वोदयघ्न इत्यादिनाल
ग्नंविधायससन्धयोद्वादशभावाः साध्या
इतिमध्यादिलग्नानयनम् ॥ श्रीः ॥

॥ अथ चंद्रपर्वसंभवाधिकारः ॥

गतैष्यनाडीगुणिताद्युभुक्तेःषष्ट्याप्तलि
प्तोनयुतोनभोगः । तत्कालजोराहुवदे
वदेयंशुक्रज्ञकेंद्रे चलनं विलोमम् ॥१५॥



Indira Gandhi National
Centre for the Arts

रसनागधरा १८६ जिना २४ विद्श्चलकेंद्रस्यभृगोर्नगाऽगनयः । अथवारिधिवारणाद्रयो विदिगंशाः७८३ ।५४च्छ्रिकेंद्रजागतिः ॥ १६ ॥एवं पर्वांतराहून चंद्रबाहूद्भवा लवाः । यदिशक्त्काल्पका श्चंद्रग्रहणं स्यात्तदाध्रुवम् ॥ १७ ॥ इति चन्द्रग्रहणसंभूतिज्ञानम् ॥

स्पष्टार्थाः ॥

॥ अथ चन्द्रग्रहणाधिकारः ॥

विपातचन्द्रस्य भुजांशकोष्टे फलंतदूनगतशेषघातात् । षष्ठ्याप्तलिप्ता सहितं विपातग्लौर्गोलदिक्कः कलिकादिबाणः ॥ १८ ॥ त्रिभिर्विभक्तोऽंगुलपूर्वकः स्याद्राहोर्लवांगांशसमानकोष्ठे । त्रैराशिकादत्र शरोंगुलादिः सर्वक्षनाडीतलसंस्थिता स्यात् ॥ १९ ॥ सपातबिंबं हिमरश्मिबिंबं रवेभसंख्यातलसंस्थबिंबम् । पलादि भागाद्यनुपाततो ऽत्रस्पष्टत्वमेषांगुर

वो वदंति ॥ १०० ॥ स्वबिंबतलसंस्था स्यात्स्पष्टाभुक्ती शशीनयोः । पातबिंबमिनकर्क्षाधः स्थितं क्षेपान्वितं स्फुटम् ॥ १०१ ॥ पातेन्दुबिंबैक्यदलं शरोनंछन्नमवेच्छाद्यवपुर्विहीनम् । खच्छन्नकंस्यात्स्थगिताधरस्थास्थितिर्भवेत्स्पष्टतराऽनुपातात् ॥ १०२ ॥ सा खच्छंनांगुलाभ्यस्ता पिहितांगुलभाजिता । मर्द्दनाड्याादिकं प्रोक्तं सुखार्थं पूर्वसूरिभिः ॥१०३॥ विंशोपकाःस्युः स्थगितं नखघ्नं छाद्यविंबहृत् । खनेत्रैरूनिता स्ते तुशेषाः खच्छन्नजामताः ॥ १०४ ॥ युग्माहतैरित्यनेन । तिथिविरतिरित्यनेन । त्रिभयुतोनरविः स्वधुग्रहइत्यारभ्यग्रहमन्यादिशिग्रखग्राऽथवाशेषकमित्यनेनच सर्वंसिद्धम् ॥ इतिचन्द्रग्रहणाधिकारःसमाप्तः ॥

---

पौर्णमांतेयद्वद्यमाननक्षत्रं तस्य गतैष्यघटिकायोगःकार्यः । तत्तुल्यघटिका

घस्थंचंद्रबिंबं पातबिंबंनामभूभाबिंबंग्रा
ह्यं । अग्रिमांतरेणशेषपलानिगुण्य।नि
षष्ट्याभक्तेनलब्धांगुलैरग्रिमकोष्ठकवशा
त्सहितरहितानिकार्याणि । अंगुलात्म
कचंद्रबिंबंभूभाबिंबं च भवति ॥

॥ अथ भभायाःसंस्कारः ॥

पौर्णमास्यांयद्राशौसूर्यसंक्रांतिरस्तित
द्राश्यधस्थमङ्गुलादिकंपातफलंस्थाप्यं ।
अग्रिमांतरेणसूर्यस्यभागाद्यंगुण्यंत्रिंशता
भाज्यंव्यंगुलात्मकफलेन पातफलमग्रिम
कोष्ठकवशाद्धिनान्वितंकार्यं । अनेनभूभा
युताकार्यासास्पष्टाभवति । पातफलंस
दाधनंतदनंतरंरवि चंद्रबिंबयोर्योगार्धंका
र्यं । तन्मानैक्यखण्डंभवति । तच्छरो
नंकार्यंग्रासोभवति ॥ उदाहरणम् ॥ शके
१५३४ वैशाखशुक्ल १५ सोमेघटी ५४।४
० अनुराधानक्षत्रस्यगतैष्ययोगः ५८।
६ । सूर्यः १।६।३४।३७। चंद्रः
७।६।३४।३५ राहुः १।१४।
१८।११ अष्टपंचाशद्घटिकादधस्थं चं
द्रबिंबं ११।१० अग्रिमांतरेण ११ शेषं

गुणितं ३१। ६ षष्ट्याभक्तं फलेनसंस्कृतं जातंचंद्रबिंबं ११।४ भूभाबिंबं २८। १६ अनुपातफलेन २२ संस्कृतं। २७। ५४ वृषसंक्रांत्यधस्थंफलं०।३१। अग्रिमा न्तरेण ।६। शेषगुणितं ६।३४।३७ जातं ३१ त्रिंशद्भक्तफलेन १ संस्कृतं ०।३२ अ नेनभूभायुताजातास्पष्टाभूभा २८।३६ अनयोर्योगार्धंजातंमानैक्यखण्डं११। ४५

॥ अथ शरसाधनं ॥

पर्वान्तकालीनःसपातचंद्रःकार्यः। अ थवाविराहुचंद्रःकार्यः षड्भधिकश्चेद्भगणा द्विशोध्यः। न्यूनोयथास्थितएव। तस्यां शाः कार्याःषड्भिर्भक्ताःकर्याःलब्धप्रमि तकोष्टकस्थांगुलादिःशरोग्राह्यः। अग्रि मांतरेणशेषगुण्यंषड्भक्तंलब्धांगुलैः सं स्कार्यस्तदांगुलात्मकःशरोभवति। उदा हरणम्। विराहुचन्द्रस्यांशाः १७२।१६। १४ षड्भक्ताःफलं२८।४६। शरः। अनुपा तफलेन ६।२७संस्कृतोजातःशरांगुलादिः १२।६। अनेनरहितंमानैक्यखण्डंजातो ग्रासः ७।३९।॥ अथ स्थित्यानयनम् ॥

सपातइति ॥ ग्रासस्यांगुलप्रमितकोष्टका दधस्थास्थितीस्थ।प्या । अग्रिमांतरेणव्यं गुलानिगुण्यानिषष्ठि भक्तानिलब्धपलैः सहिताःकार्याः । घटिकादिस्थितिःस्यात् । उदाहरणम् ॥ ग्रासः ७।३१ स्थितिः ३।३५ अनुपातफलेन ७ सहिताजाता घटिकादिस्थितिः ३।४२ अन्यदवशिष्टंक रणोक्तरीत्यासाध्यमिति चंद्रग्रहणोदाहर णम् ॥ ॥ श्रीरस्तु ॥

॥ अथसूर्यग्रहणाधिकारः ॥

दर्शांतविंत्रिभतनून्नतभागभचभागप्रमे नुपतनादृगुणकोथतंघ्नम् ॥ भास्वत्त्रिभोन विवरांशरसांशकोष्ठाधस्थं फलं भवति लंबननाडिकाद्यम् ॥१०५॥ तेनयुक्तोवि युक्तोऽथदर्शःस्पष्टोऽसकृद्भवेत् । अल्पेनलये दिवानाथेसतिवित्रिभलग्नतः ॥१०६॥ त्री न्दु १३ संगुणितलंबनंव्यगौलिप्रिकाधन मृणं ततः शरम् ॥ अङ्गसंगुणविलंबनं ल वान्वित्रिभेकुरु ततोनतांशकान् ॥१०७॥

तच्छरांशमित कोष्ठकेफलं ह्यंगुलादिक
नतिर्नतांशदिक् ।तद्युतोनितसमान्यदिक्
शरःप्रस्फुटोभवति तेन हीनितम् ॥१०८॥
बिंबयोगदलमर्कचंद्रयोः छन्नमंगुलमुखं
रवेर्भवेत् । पक्षतद्युतवियुग्मैरसैर्मास
कै ६।१५।५।१५।६। रपिच पर्वसंभवः ॥
१०९॥ स्थित्योनयुक्तोगणितोत्थदर्शांस्ता
त्कालजाभ्यामथ लंबनाभ्याम् ॥ सुसंस्कृ
तःप्राग्ग्रहमोक्षकालौमध्यग्रहः स्यात्स्फु
टदर्शकाले ॥ ११० । शेषंचन्द्रग्रहणोक्त
रीत्याज्ञेयम् ॥ इतिसूर्यग्रहणम् ॥

---

दर्शोतिशाके१२५३मार्गशीर्षकृष्ण३०बु
धेघटी ११। पल ५१ सूर्यः ८।५।२६।२८
लग्नं १।२।५।३४ त्रिभोनं १०।२।५।३४
अमावास्यायस्मांसंक्रांतौ भवतितत्संक्रां
तिराश्यधस्थंसूर्यबिंबंस्थाप्यं । अग्रिमां
तरेण सूर्यस्पभागाद्यंगुल्यं त्रिंशद्भक्तमंगु
लात्मकफलंअग्रिमकोष्ठकवशाद्धिनान्वितं
कार्यं । अंगुलाद्यं सूर्यबिंबंभवति । उदा

हरणम् ॥ धनुराशौसूर्यबिंबं११। १४ अनु
पातव्यंगुलैःसंस्कृतंजातंरविबिंबं ११।२४
अथलंबनसाधनमाह। त्रिभोनलग्नार्का
न्तरांशाः। तेयथाराशित्रयाल्याभवंतित
थाकार्याः । तदनंतरं षड्भिर्भाज्याःल
ब्धप्रमित पंचदशकोष्टकाधस्थंघटिका
दिलंबनंग्राह्यं । अग्रिमांतरेणशेषंगुण्यं
षड्भिर्भाज्यंलब्धैःपलैः सहितंघटिकादि
लंबनंस्यात् ॥ सूर्यात्त्रिभोनलग्नेऽधिकेस
तिधनं ॥ न्यूनेऽधनज्ञेयं । उदाहरणं ।
त्रिभोनलग्नार्कांतरांशाः ॥ ३।२०।४६। ष
ड्भिर्भक्तालब्धंशून्यं। शून्यादधस्थंघटिक
दिलंबनं ०।०।०। अग्रिमांतरेण २४।२५।
शेषं ३।२०।४६। गुणितं८१।४२३ षड्भि
र्भक्तंलब्धपलांकैः १३। ५८ सहितजातंघ
टिकादिलंबनं ०।१४ अन्यदवशिष्टंपू
र्ववत् । एतत्पंचदशकोष्टकस्थलंबनस्यां
कोपरिगृहणंस्थूलम् ॥

अथस्थूलक्रांतिसाधनमाह ॥ सायनग्र
हस्यभुजांशाःकार्याः। षड्भिर्भाज्याःलब्ध
प्रमितकोष्टकस्थाघटिकाद्या।क्रांतिः स्या

प्या । लंबनवदनुपातःकार्यः ॥ तदनं
तरंषड्गुणितःकार्याभागादिक्रांतिः स्या
त् ॥ उदाहरणम् ॥ सूर्यः ८।५।२६।२०
अयनांशाः १६।३१।५५ सायनसूर्यः
८।२२।६।१४ अस्यभुजांशाः ८२।६।१४
षड्भक्तोलब्धं १३ घटिकादिक्रांतिः ३।
५४।३६पलात्मकेनानुपातेन २।४४ स
हिता ३।५७।२० षड्गुणिताजाताभा
गाद्याक्रांतिः २३।४४ग्रंथकर्त्राएतेपंचदको
ष्ठकस्थांलंबनस्यांकाः। अन्येपंचदशकोष्टे
षुविपरीतास्थापिताः। एवंत्रिंशत्कोष्टेषु
क्रांत्यंकाजाताः। अस्योपरिक्रांतिसाध
नं। सायनग्रहः षड्भाधिकश्चेच्चक्राद्वि
शोध्यस्तस्यांशाः कार्याः षड्भिर्भाज्या
लब्धकोष्टस्याघटिकादिक्रांतिः। पूर्वव
त्सानुपाताद्ग्राह्याः। अत्रानुपातफलम
ग्रिमकोष्ठवशाद्धिनान्वितंकार्यं इयंक्रांतिः
पूर्वेणसहतुल्या। उदाहरणम्॥ सायनसू
र्यः ८।२२।६।१४। भगणा १२ च्युता
३।७।५३।४६ अंशाः ९७।५३।४६ षड्भ
क्ताःफलं १६। क्रांतिः ३।५८।३६ अनु

पातफलेन १।१६ रहितापद्गुणितासैव क्रांतिः २३।४४।० ॥

॥ अथ सूक्ष्मक्रांतिसाधनम् ॥

सायनग्रहस्यभुजांशप्रमितकोष्टकस्थाभागाद्याक्रांतिरुथाप्या । अग्रिमांतरेणकलाद्यंगुण्यंषष्ट्याभागेनकलात्मकेनफलेनसहितंकार्यंभागाद्याक्रांतिःस्यात् २३।४४।५८॥

अथशरसाधनं ॥ सपातचंद्रस्य । अथवाविराहुचंद्रस्यभुजांशप्रमितकोष्टकस्थःकलादिशरोग्राह्यः । अग्रिमांतरेणशेषंगुण्यंषष्ट्याभाज्यंविकलात्मकेनफलेनसहितंकार्यंकलादिबाणःस्यात् ॥ त्रिभिर्भाज्योंगुलादिःस्यात् ॥ उदाहरणं।विराहुचंद्रस्याभुजांशाः ७।४३।४६। शरः ३२।५३। अनुपातफलेन ३।२४ सहितोजातः कलादिःशरः ३६।१६ त्रिभिर्भक्तोजातोंगुलाद्यशरः१२।५॥ इतिसूर्यग्रहणोदाहरणम्

॥ अथो दयास्ताधिकारः ॥ यल्लग्नमस्तंव्रजतिख मध्यंस मुद्गमं प्राग्व्रजतोऽस्त्रिभादेःतत्सायनांशैः सहितस्यभुक्त भागाहताः स्वोदयखाग्निभागः । स्वाभुक्तकालोर ॥ सभायनांशान्वितार्कभोग्यांशकतो ऽपज्रोग्याः । त द्योगयुक्तांतरभोदयानांष

Indira Gandhi National Centre for the Arts

ष्ट्रांशतुल्या निशियात नोडग्रः ॥ ११२॥
सायनार्कमेलग्नसांगमार्कौ लवांतरम्।
तदोदयघ्नं खत्र्याप्तमिष्टकालः पलादिकः
॥ ११३ ॥ इतिनक्षत्राद्रात्रिघटीज्ञानम् ॥

स्पष्टाशुकेन्द्रांशसमानकोष्टे कर्णोभ
वेत्कोविदकाव्यपातौ । मध्याशुकेन्द्रे
ण युतौ स्फुटौ स्तः पातोन मंदस्फुट
दोर्लवेभ्यः ॥ ११४ ॥ शरांगुलादिः श
शिवन्नखघ्नः कर्णोद्धृतोऽथस्वगुणांशकेन
हीनोगुरोर्युग्घ्नसितार्कजानां पातोनदि
क्स्पाद्विशिखोऽगुलादिः ॥ ११५ ॥ सू
र्या १७ त्वष्ठीं १७ द्र १४ रुद्रा ११ शा
१० तिथि १५ तुल्याःशशांकतः ॥ का
लभागाःस्मृता चूना वक्रिणोर्बुधशुक्र
योः ॥ ११६ ॥ प्राक्त्रिभेण वर्जितात्स
युताच्चपश्चिमे । खेटतोऽपमाक्षयोः सं
स्कृतिर्नतांशकाः ॥ ११७ ॥ तत्पंचमांशो
न्मित कोष्ठकस्थं फलं तदैष्यांतरनिघ्न
शेषात् ॥ सपंचमांशं विशिखांगुलघ्नं ल
वादिदृक्कर्मखगे धनर्णम् ॥ ११८ ॥ न
तांशनाराचदिगैक्यभेदे व्यस्तंपरे दृक्ख

चरो भवेत्सः। यः सूर्यदृक्खेचयोरनल्पोल
ग्नंतदल्पोरविरत्रकल्यः ११९ मध्येतयोर्या
घटिकारसघ्नाः कालांशकाः सांगमयोस्तु
पश्चात् ॥ १२० ॥ एता यदाप्रोक्तलत्रा
धि कोनायातैष्यकःस्यादुदयोन्यथास्तः।
तदंतरालस्य कलाखखाग्नि ३०० नि
घ्नाविभक्ता रविभोदयेन ॥ १२० ॥ प
श्चातुतत्सप्तमभोदयेन गत्योर्वियुक्ता वि
हृतास्तु वक्रे ॥ युत्यात्र लब्धैर्दिवसैर्गतै
ष्यैःस्पष्टौभवेतांखचरोदयास्तौ ॥ १२१ ॥

अथागस्त्योदयास्तज्ञानं सूक्ष्मतरं
स्थूलञ्चमयोच्यते ॥

पलभया वसुसंगुणया पृथक् पलरुचे
र्दलरामत्र ३ लवोनया। खनिघयो ९० गंज
षट् ।६८ सहितायुता इहरवावुदयानुद
यौ मुनेः ॥ १२२ ॥ नागाहताङ्कप्रम
योनयुक्ता नागाद्रयो ७८ नागखगा
९८ श्चभागाः । तत्तुल्यभानौकलशोद्भव
स्यमुने रिहादर्शनदर्शनेस्तः ॥ १२३ ॥

इति श्रीदिवाकरविरचितंमकरन्दविवरणं श्रीविश्वनाथ
दैवज्ञकृतोदाहरण सहितं समाप्तम् ॥
उमाशङ्करमिश्रेण संशोधितम् ॥ सं १९७३ मार्गशीर्षे कृष्ण ६

IGNCA RAR
R-198
ACC No
Indira Gandhi National
Centre for the Arts

1087

Indira Gandhi National
Centre for the Arts